19

B-4

37

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

SASTHRAMUKTHAVALI - 11.

AVACHEDAKATA NIRUKTHI.

By

MAHAMAHOPADHYAYA

SRI GADADHARA BHATTACHARYA

With

DIDHITHI

OF

Raghunadha Siromani

EDITED BY

P. B. ANANTHACHARIAR

PRINTED AT THE

SRI SUDARSANA PRESS

CONJEEVERAM.

1901.

Price As. 0-8-0

(Copy Right Registered.)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीः ।

शास्त्रमुक्तावळी - ११

37

अवच्छेदकतानिरुक्तिः ॥

महामहोपाध्याय श्रीगदाधरभट्टाचार्य विरचिता ।

श्रीरघुनाथशिरोमणि विरचितया

दीधित्यासह

श्रीकाञ्ची प्रतिवादिभयंकर

अनंताचार्येण

परिशोधिता

श्रीसुदर्शन मुद्राक्षरशालायां समुद्रित ।

श्रीकांची ॥

१९०१

इदानीं एतन्मूल्यम् - ०-८-०

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीरस्तु ।

श्रीमते हयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

अवच्छेदकतानिरुक्तिः ।

दीधितौ - अवच्छेदकता निरुक्तिः ॥

नन्ववच्छेदकत्व मिह न स्वरूपसम्बन्ध विशेषः,

गदाधरीयम् ।

'प्रतियोगितानवच्छेदके' त्यत्र पारिभाषिकावच्छेदकत्वं निवेशयितु-मवच्छेदकपदस्य स्वरूपसम्बन्ध रूपावच्छेदकत्वपरता माक्षिपति (नन्वित्यादिना) " इह " - एतल्लक्षणे । घटकत्वं सप्तम्यर्थः :। तथाच - घटत्वेन घटोभावप्रतियोगीत्यादि प्रतीति साक्षिकया घटनिष्ठप्रतियोगितया सह घटत्वादे रवच्छेद्यावच्छेदकभावरूपः स्वरू-पानतिरिक्तः पदार्थान्तरात्मकोवा यः सम्बन्धविशेषः स इहलक्षणे नशक्य निवेशनइत्यर्थः । स्वरूपसम्बन्धविशेषात्मकावच्छेदकत्वाभाव घटितं निरुक्तरूपं नव्याप्तिस्वरूप मिति यावत् । "तेन रूपेण साध्यतायां व्यभिचारिण्यतिव्याप्ते" रित्यग्रिममत्रैव हेतुः । प्रमेयधूमत्वाद्यवच्छिन्नसा-ध्यकव्यभिचारि साधारणत्वादिति तदर्थः । "प्रमेयधूमत्वे"त्यादिकं-"अतथात्वेने" त्यन्तं तत्र हेतुः । स्वसमानाधिकरणाभाव प्रतियोगिता निरूपित तादृशावच्छेदकत्वाभावव त्तादृशसाध्यतावच्छेदकत्वेनेति तदर्थः । सम्भवत्तादृशप्रतियोगितावच्छेदकताक धर्मापेक्षया गुरुत्वं प्रमेय

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सम्भवति लघौ धर्मे गुरौ तदभावात् ।

धूमत्वादे स्तादृशप्रतियोगितावच्छेदकत्वाभावसाधकं । तस्य तत्सा-धकत्वोपष्टंभकव्याप्तिमाह (सम्भवतीति) तस्मिन्निति पूरणीयम् । तथाच-लघुधर्मे तादृशावच्छेदकत्वस्य सम्भवइत्यर्थः । "गुरौ तदभावात" - तादृशावच्छेदकत्वाभाव नियमात् ।

तथाच - सम्भवत्तदवच्छेदकताक धर्मापेक्षया यो गुरुः, स नतदवच्छेदक इति व्याप्तिरिति पर्यवसितार्थः । सम्भवत्तदवच्छेदकताकत्वं च तदवच्छेदकत्वबाधकशून्यत्वं । बाधकंच अवच्छेद्य प्रतियोगित्वासमनियतत्वम् । तथाच तत्प्रतियोगित्वादि समनैयत्यमेव सम्भवत्तदवच्छेदकताकत्वपर्यवसितम् । समनैयत्यघटक दळद्वयनिवेशात् घटपटान्यतरत्व महानसीयवह्नित्वा द्यवच्छिन्नाभाव प्रतियोगितायां न्यूनवृत्तिघटत्वादे रतिरिक्तवृति शुद्धवह्नित्वादे श्चावच्छेदकत्वासम्भवेन तादृशतादृशगुरुधर्मस्य नावच्छेदकत्वानुपपत्तिः । प्रतियोगिताया स्समनैयत्यंच प्रतियोगिताया अन्यूनवृत्तित्वे सति तन्निरूपकाभाव विरोधितावच्छेदकत्वरूप मवच्छेदकतानिर्वाहकम् । अतः सत्तात्वादे र्विशिष्टसत्ताद्यभावीयप्रतियोगित्वा न्यूनानतिरिक्तवृत्तित्वेपि तदभावविरोधित्वानवच्छेदकत्वा न्नतत्प्रतियोगितावच्छेदकत्वसम्भवः ।

यत्तु - 'स्वावच्छिन्नसमव्यापकतावच्छेदक धर्मापेक्षया गुरुत्वमेवावच्छेदकत्वाभावसाधकतयाभिमतं, स्वसमनियतसत्तात्वाद्यपेक्षयागुरो र्विशिष्टसत्तात्वादेः प्रतियोगितावच्छेदकत्व निर्वाहाय स्वसमनियतत्व मुपेक्ष्य स्वावच्छिन्नसमव्यापकतावच्छेदकत्व निवेश' इति । तन्न, घटप्रागभावत्वावच्छिन्न समव्यापकतावच्छेदक घटत्वाद्यपेक्षया गुरो र्घटप्रागभावत्वादे रत्यन्ताभावप्रतियोगितावच्छेदकतया जातित्वाद्यवच्छिन्न समव्यापकतावच्छेदक तद्घटकसमवेतत्वाद्यपेक्षया गुरो र्जातित्वादे र्भेदप्रतियोगितावच्छेदकतयाच व्यभिचारात् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रमेयधूमत्व कम्बुग्रीवादिमत्व —

ननु - मेयधूमत्वं स्वावच्छिन्नधर्मिविशेषणतापन्न मेयत्वसहित धूमत्वं, सामानाधिकरण्यसम्बन्धेन मेयत्वविशिष्टधूमत्वंवा । उभयथैव तदवच्छिन्नसाध्यके नातिव्याप्तिप्रसक्तिः, शुद्धधूमत्वस्या वच्छेदकत्वे तादृशान वच्छेदकताया विशिष्टधूमत्वे दुर्घटत्वात् ; एकदेशपर्याप्तवृत्ते र्व्यासज्यवृत्ति धर्मावच्छिन्नानुयोगिताकाभावस्य - विशेष्यपर्याप्तवृत्ते र्विशेषणान्तर वैशिष्ट्यावच्छिन्ना नुयोगिताकाभावस्य वा नभ्युपगमात् । शुद्धवह्नित्वादौ धूमादिसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वा पर्याप्ते मेयवह्नित्वादौ तदनवच्छेदकत्वसौलभ्येन मेयवह्निमान् धूमादित्यादावव्याप्तिविरहा, दित्यरुचेः कम्बुग्रीवादिमत्त्वा नुधावनम् ।

नचैवं प्रमेयधूमत्वावच्छिन्न साध्यके ऽतिव्याप्त्यभिधान मत्यन्तासंगतमिति वाच्यम् । व्यासज्यवृत्ति धर्मावच्छिन्ना नुयोगिताकाभावा नभ्युपगमेन नानाव्यक्तिदण्डावच्छिन्नस्य व्यापकतानिर्वाहाय प्रतियोगितावच्छेदकापर्याप्त विषयत्वपर्याप्ति रनवच्छेदकान्तार्थइत्याशयेनैव तदभिधानात् । कम्बुग्रीवादिमत्त्वंच घटत्वव्यंजक संस्थानविशेषः । घटत्वापेक्षया तस्य गौरवं - संस्थानस्य विजातीयावयव संयोगरूपस्या नन्तत्वात् , अनुगमकजातिविशेष सापेक्षत्वाच्च । घटत्वस्य चैकस्य जातिरूपस्य निर्विशेषणकस्या वच्छेदकत्वे लाघवादिति ।

नच घटसामान्याभाव प्रतियोगितायां संस्थानविशेषस्या नवच्छेदकत्वेपि तत्तत्संस्थानव दभावकूटप्रतियोगितासु प्रत्येकं तेषामवच्छेदकत्व मावश्यकम् , तत्रातिप्रसक्त घटत्वस्या वच्छेदकत्वासम्भवा दित्यनुगतरूपावच्छिन्नेष्वपि तेष्वनवच्छेदकत्वं दुर्घटमिति तदवच्छिन्नसाध्यके नातिव्याप्त्यवकाश इति वाच्यम् । तत्तत्संस्थानव तत्तद्घटाभाव प्रतियोगितायामपि घटनिष्ठ तत्तद्व्यक्तित्वस्यैव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

घ्राणग्राह्य गुणत्वादे-

साक्षात्संबन्धेनावच्छेदकत्वसम्भवात् । परम्परासम्बन्धेन स्व-समवायि समवेतत्वात्मकेन तत्तत्संयोगानां गौरवेणा नवच्छेदक-तया तादृशसम्बन्धेन संस्थानविशेषावच्छिन्न घटादिसाध्यके व्यभि चारिहेतावतिव्याप्ते दुर्वारत्वात् ।

ननु- मृत्पाषाणादिघटसाधारणं घटत्वं नैकम् , मृत्त्वपाषाणत्वादि-ना संकरप्रसगात् , इति तत्तज्जातिव्याप्यं नानैव । तथाच तथा-विध सकलघटानुगमक संस्थानविशेषावच्छिन्न प्रतियोगितायां न स्वरूपतो घटत्वस्यावच्छेदकता सम्भवः, न्यूनवृत्तित्वात् ; नाप्यनुगत-रूपान्तरावच्छिन्नस्य , तादृशरूपान्तर प्रवेशेन गौरवादित्यरुचेः घ्राणग्राह्यगुणत्वानुधावनं । घ्राणग्राह्यत्वं-घ्राणग्रहणयोग्यता , गुणत्वन्यून वृत्ति घ्राणग्राह्यजातिरूपा , साचातीन्द्रियेपि गन्धइति न गन्धत्वस्य दर्शित रूपवत्सामान्याभाव प्रतियोगिता सम नैयत्या नुपपत्तिः । तादृशयोग्यतामात्रस्योपादाने गन्धत्वसुरभित्वादिरूपाया स्तस्याः स्वरूपतो हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकतया तादृ-शजातित्वाद्यवच्छिन्नाया अप्यनवच्छेदकत्वं दुर्घटमिति तद्विशेष्यतया गुणत्वनिवेशनं । द्रव्यत्वादिहेतुकस्थलेच गुणत्वस्य शुद्धस्यापि हेतु-समानाधिकरणाभाव प्रतियोगितावच्छेदकत्वासम्भवात विशिष्ट-गुणत्वस्य गन्धत्वसमनियतस्य तादृशप्रतियोगितानवच्छेदकत्वम-क्षतमेवेत्यतिव्याप्ति सगंतिः । अथवा घ्राणग्राह्यगुणत्वं स्वाश्रयगु-णत्वव्याप्यजातिमत्व सम्बन्धेन घ्राणजन्यसाक्षात्कार विषयतावत्वमेव, गुणत्वव्याप्यजातिघटित सम्बन्धलाभाय गुणपदम् । नतुगुणत्वमपि विशे ष्यतया विवक्षितम् ।

एतेन गुणत्वस्य निरुक्तजातित्वावच्छिन्न गन्धत्वादिविशेष्यतया विव क्षितत्वे स्वरूपतो गंधत्वादे र्गुणत्वविशेषणताया मप्यतिप्रसंगात तादृश

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रथात्वेन तेन रूपेण साध्यतायां व्यभिचारिण्य तिप्रसंगात् । नाप्य-
नतिरिक्तवृत्तित्वम् ,

जातित्वावच्छिन्नस्य विशेषणत्वानुधावनं निर्बीजमिति दूषणमनवकाशम् । घ्राणग्राह्यगुणत्वं यथाश्रुतमेव ग्राह्य गन्धत्वरूपलघुधर्मसमनियततया न प्रतियोगितावच्छेदकमित्यपि वदन्ति ।

यत्तु अनवच्छेदकत्वं अवच्छेदकाविषयक प्रतीति विषयत्वम् , तथाचावच्छेदकता घटकसम्बन्धेन विशेष्यांशे अवच्छेदकप्रकारक प्रतीति भिन्ना साध्यतावच्छेदकताघटकसम्बन्धेन यादृशधर्मप्रकारिकाप्रतीति स्तादृशधर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरितिपर्यवसितम् । एवंच प्रमेयधूमत्वादिप्रकारकप्रतीते र्धूमत्वादिप्रकारकता नियमा त्प्रमेयधूमत्वाद्यवच्छिन्नसाध्यके ऽतिव्याप्तिपरिहारः सम्भवति । नतु निरुक्तघ्राणग्राह्य गुणत्वाद्यवच्छिन्नसाध्यके , गन्धत्वादिकमविषयी कृत्यापि सुरभित्वादिकं — सुरभित्वादिक मविषयीकृत्यापि च गन्धत्वादिकं विषयीकृत्य तादृशसाध्यतावच्छेदक प्रकारकप्रतीति संभवादिति ।

तन्न ; तथासत्युक्तरीत्या दण्डिमान् द्रव्यत्वादित्यादावतिव्याप्तेः; प्रत्येकं सकलदंडमविषयीकृत्यैव दंडत्वावच्छिन्नदंडात्मकसाध्यतावच्छेदक प्रकारक प्रतीतिसम्भवात्। अथ प्रतियोगितावच्छेदकी भूता ये येधर्माः तत्तत्प्रकारक प्रतीतिभेदकूटस्य साध्यतावच्छेदकता घटकसंबन्धावच्छिन्न साध्यतावच्छेदक प्रकारिकाया मेकप्रतीता वसत्वात तथैवच लक्षणे विवक्षितत्वा न्नेयमतिव्याप्ति रिति चेत? तर्हि तादृशरीत्या निरुक्तघ्राणग्राह्यगुणत्वावच्छिन्न साध्यकेपि नातिव्याप्त्यवकाश इति ।

" अतथात्वेन " — प्रतियोगितानवच्छेदकत्वेन । (अनतिरिक्त वृत्तित्वमिति) स्वव्यापक तत्कत्वमित्यर्थः । तच्छून्यावृत्तित्व विवक्षणे समवायेन प्रमेयसाध्यके व्यभिचारि ण्यतिप्रसंगात । प्रमेय

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सामान्याभाव प्रतियोगिताशून्या प्रसिद्ध्या प्रमेयत्वादेः तादृशावच्छेदकत्वा निर्वाहात्। महानसीयत्वादिविशिष्ट वह्नित्वाद्यवच्छिन्न साध्यके धूमादौ वह्नित्वादे र्महानसीय वह्न्याद्यभाव प्रतियोगिताशून्य वह्न्यन्तर वृत्तितया विशिष्टेपि तत्र तच्छून्यावृत्तित्वस्य दुर्घटतया ऽतिप्रसंगाच्च। स्वव्यापक तत्कत्व निवेशनेच विशिष्टस्याविशिष्टस्य वा यादृशस्यावच्छेदकत्व मभिमतं तादृशस्यैव स्वपदेनोपादेयतया विशिष्ट वह्नित्वादिकं प्रति विशिष्टवह्न्याद्यभाव प्रतियोगिताया व्यापकत्वस्या क्षतत्वेन तादृशस्यावच्छेदकत्वोपपत्तेः। ईदृशं यद्यत्स्वं तत्त्वाभावकूटस्यच साध्यतावच्छेदक विशेषणता बोध्या, अतः स्वत्वाननुगमेनैक सामान्याभाव निवेशासम्भवा द्यत्किंचिदेकावच्छेदक निष्ठावच्छेदकत्व मादायाति प्रसंगानवकाशः ।

नच – स्वपदस्य तत्तद्व्यक्ति परतया ऽवच्छेदकनिष्ठं तत्तद्व्यक्तित्वमेव पर्यवसित मवच्छेदकत्वं , तथाच विशेषणावच्छिन्ननिष्ठ तद्व्यक्तित्वस्यापि विशेष्यपर्याप्ततया विशिष्टवह्नित्वादे रवच्छेदकत्वे शुद्धस्याप्यनवच्छेदकता दुर्भिक्षमिति वाच्यम्। शुद्धस्य विशेषणान्तरसहितस्य वा यादृशस्याधिकरणता ऽभावप्रतियोगितानिष्ठ व्यापकताशरीरे निविष्टा, तादृशरूप पर्याप्तावच्छेदकता पर्याप्त्यनधिकरणत्वस्य साध्यतावच्छेदक विशेषणत्वोपगमात्। मेयधूमत्वादि पर्याप्ताया अभावप्रतियोगितावच्छेदकताया अप्रसिद्धावपि तथाविधाया विषयताद्यवच्छेदकतायाः प्रसिध्या ऽतिव्याप्त्यनवकाशात्। महानसीयत्वादिसहित वह्नित्वादिपर्याप्तावच्छेदकतायाः शुद्धवह्नित्वादा वपर्याप्तत्वा द्विशिष्टवह्न्याद्यभाव मादाय दोषानवकाशात् ।

अत्र – यदि हेतुसमानाधिकरणाभाव प्रतियोगिता सामान्यानतिरिक्तवृत्तित्वं निवेश्यते , तदा निखिलवह्न्यादेरेव धूमादिसमानाधिकरण विशेषाभावप्रतियोगितया वह्नित्वादेरपि स्वव्यापकतावच्छेदक तादृशप्रतियोगितात्वकत्वरूप तादृशप्रतियोगिता सामान्यानतिरिक्तवृत्तित्वेन तथाविधप्रतियोगितानवच्छेदकत्वानुपपत्ति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात् । न च तथाविध यत्किंचिदेकाभाव प्रतियोगितासामान्यशून्यावृत्तित्वं तत्, अतएवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि

रिति तादृश यत्किंचि देकप्रतियोगिता नतिरिक्तवृत्तित्वं स्व समानाधिकरण भेदप्रतियोगितानवच्छेदक तादृशप्रतियोगिताकत्व रूपं निवेशनीयम् ; तथा सति धूमवान् वह्ने रित्यादौ धूमत्वादेरपि तादृशावच्छेदकत्वं नस्यात , धूमादिसामान्याभाव प्रतियोगितायाः अपि धूमादिस्वरूपतया प्रतिधूमादिकं भिन्नत्वेन प्रत्येकं धूमत्वादिसमानाधिकरण भेदप्रतियोगितावच्छेदकत्वादिति तत्तद्धूमत्वादेरेव तथात्वादतिव्याप्ति रित्याह (प्रतियोगिताया इति) "स्वरूपसम्बन्धात्मिकाया" इति प्रतिव्यक्तिभेदप्रयोजकहेतुगर्भं विशेषणम् । अतिरिक्तपदार्थरूपप्रतियोगितायाः सिद्धान्तविरुद्धत्वादिति भावः । तादृशप्रतियोगिता सामान्यानतिरिक्त वृत्तित्वनिवेशेपि हेतुसमानाधिकरणाभावत्वेन तादृशाभावनिवेश एव पूर्वोक्तदोषः , नतु तादृशाभावस्य प्रातिस्विकरूपेण निवेशने, तत्तद्विशेषाभाव प्रतियोगितात्वस्य वह्नित्वादिव्यापकतानवच्छेदकत्वा दित्याशयेना शंकते (नचेति) (तथाविधेति) प्रतियोग्यनधिकरणहेतु मद्वृत्तीत्यर्थः । "यत्किंचि" त्पदं तत्तद्व्यक्तित्वेना भावनिवेशलाभाय । प्रत्येकंनिविष्टस्यापि तथाविधाभावस्य सकलस्य नैकत्रावच्छेदकताघटकता, किन्त्वेकस्यैवेति स्फोरणाय एकपदम् । तादृशप्रतियोगिता सामान्यशून्यावृत्तित्वं स्वव्यापकतावच्छेदक तादृशप्रतियोगितात्वकत्वम्, अतो न पूर्वोक्तदोषः । "अत एवं"- ईदृशावच्छेदकत्वस्य मूलाभिप्रेतत्वादेव (अतिरिक्तेति) सामान्याभावस्य विशिष्टाभावकूटातिरिक्तत्वानभ्युपगम इत्यर्थः । (धूमत्वादेरपीति) विशेषाभावकूटान्तर्गतमेक मभाव मुपादाय धूमत्वादौ निरुक्तावच्छेदकत्वोपपादनासम्भवादितिभावः (तत्साधनमिति) सामान्याभावस्या तिरिक्तत्वव्यवस्थापन

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

साधु संगच्छतइति वाच्यं; वह्निघटवृत्तिद्वित्वतार्णातार्ण दहनवृत्तिद्वित्वाद्यव-
च्छिन्न प्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादा

मित्यर्थः (संगच्छत इति) अन्यथा स्वरूपसम्बन्धरूपावच्छेदकत्व निवेशे विशेषाभावकूटातिरिक्त सामान्याभावानभ्युपगन्तृमतेपि वि-शेषाभावीय प्रतियोगिताकूटस्यैव सामान्यधर्मावच्छिन्नतया धूमत्वा-दावपि वह्न्यादिसमानाधिकरण धूमादिविशेषाभावप्रतियोगितावच्छेद-कत्वेना तिव्याप्त्यप्रसक्त्या सामान्याभावपार्थक्यव्यवस्थापनस्य एत-ल्लक्षणाप्रसक्तत्वे नानुपयुक्तत्वापत्ते रिति भावः ।

नचा तिरिक्तसामान्याभावाभावे उक्तरीत्या अतिव्याप्तिविरहेपि यएव वह्न्यभावा ह्रदादौ वह्नि र्नास्तीति बुद्धिंजनयन्ति प्रत्येकं धूमसमाना-धिकरणानां तेषां प्रतियोगितावच्छेदकत्वं वह्नित्वे प्यस्तीत्यव्याप्ति र्दुर्वा-रैवेति तत्साधनसंगत्या उपष्टम्भसंगति रिति वाच्यम् । हेत्वधिक-रणवृत्तित्वावच्छेदेन यादृशधर्मावच्छिन्नत्वविशिष्ट प्रतियोगिताकत्वं अतादृशत्वस्य साध्यतावच्छेदकविशेषणतां स्वीकृत्य तादृशाव्याप्ते र्वारणसम्भवात् । नहि धूमाधिकरणवृत्तित्वावच्छिन्ने विशेषाभावे वह्नित्वाद्यवच्छिन्नप्रतियोगिताकत्वं, धूमवति वह्नि र्नास्ती त्यप्रत्ययात्; अपितु याव द्विशेषाभावाधिकरण ह्रदादिवृत्तित्वावच्छिन्न एवेति ।

इद मापाततः, तथाविधा भावीय यत्किंचि देकधर्मावच्छिन्नप्रतियो-गितासामान्यानतिरिक्तवृत्तित्वं निवेश्या नतिरिक्तवृत्तित्वरूपावच्छेद-कताविवक्षापक्षेपि धूमत्वादेरवच्छेदकत्वस्य सामान्याभावानतिरिक्तत्वम-तशक्योपपादनत्वात् । हेत्वधिकरणवृत्तित्वावच्छिन्ने यद्धर्मावच्छिन्नत्ववि शिष्टप्रतियोगिताकत्वं तद्धर्मावच्छिन्नप्रतियोगिता सामान्यानतिरिक्त-वृत्तित्वाविवक्षया अव्याप्तेरपि शक्यवारणत्वात् । वह्नित्वस्य वह्निघट उभयत्वावच्छिन्नाभावप्रतियोगिता नतिरिक्त वृत्तित्वेपि तन्न्यूनवृ-त्तितयाऽन्यूनानतिरिक्तवृत्तित्व विवक्षया तादृशप्रतियोगिता मादाय-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वतिप्रसंगात् । एतेनान्यूनवृत्तित्व विशेषितमपि परास्तम् । अतएव नानाप्रतियोगिवृत्त्येक प्रतियोगितांगीकारेऽपि न निस्तारः । लघुरूपसमनियतगुरुरूपेण साध्यतायां सद्धेतावव्याप्तिः, तादृशतदवच्छिन्नत्वाप्रसिद्धे

दूषणस्योद्धार स्सम्भवतीति तार्णातार्णदहनोभयत्वावच्छिन्नाभाव-प्रतियोगित्वानुसरणम् । "अतिप्रसंगात्"-धूमादिसमानाधिकरणाभाव-प्रतियोगितावच्छेदकत्व प्रसंगात् । तार्णातार्णदहनोभयत्वावच्छिन्नाभावा नुसरण प्रयोजनं स्वयमेव स्फुटयति (एतेनेति) तार्णातार्ण दहनोभयाभाव प्रतियोगितामादाया तिप्रसंग -तादवस्थ्येनेत्यर्थः । "अन्यूनवृत्तित्वविशेषितं" - अनतिरिक्त वृत्तित्व मपि । "अतएव"- दर्शितोभयाभावमादाय वह्नित्वादावतिप्रसंगादेव(नानाप्रतियोगि वृत्त्येकप्रतियोगिता ङ्गीकारेपीति) तथासति यत्किंचिदेकाभाव प्रतियोगितासामान्यपर्यन्ता निवेशेपि धूमत्वादे धूमादिसामान्याभाव प्रतियोगितावच्छेदकत्वो पपादनसम्भवादिति भावः । उभयत्वादिरूप व्यासज्यवृत्ति धर्मावच्छिन्नप्रतियोगितायाः प्रत्येकमपि प्रतीते रव्यासज्य वृत्तितया स्वपर्याप्त्यधिकरण पर्याप्तत्वं प्रतियोगितायां निवेश्यापि वह्नित्वादावतिप्रसंगवारणा सम्भव इति ध्येयम् । प्रतियोगिताधर्मिको भयाभावघटित व्याप्तिपक्षे मेयधूमवान् वह्नेरित्यादावतिव्याप्ति र्न सम्भवति, साध्यतावच्छेदक मेयधूमत्वादिरूप गुरुधर्मावच्छेद्यत्वस्य कुत्रापि प्रसिद्धिविरहेण तद्घटितोभयाभावा प्रसिद्धेरिति तन्मते मेयवह्निमान् धूमा दित्यादा वव्याप्ति माह (लघुरूपेति) (तादृश तदवच्छिन्नत्वाप्रसिद्धेरिति) तादृशसाध्यतावच्छेदकावच्छिन्नत्वस्या प्रसिद्धेरित्यर्थः । विषयितासम्बन्धस्य वृत्त्यनियामकत्वेना भावप्रतियोगितानवच्छेदकतया तादृशसम्बन्धावच्छिन्नाभाव प्रतियोगितायां तत्प्रसिद्धिरित्यस्य वक्तु मशक्यत्वात् । अन्यथा मेयधूमवा न्वह्ने रित्यादौ अतिव्याप्तेरेव तादवस्थ्यादिति भावः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रिति चेन्न; - प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात् ।

(प्रतियोगितावच्छेदका नतिरिक्त वृत्तित्वस्येति) तथाच धूमादिसामान्याभाव प्रतियोगितायाः प्रतिधूमादिकं भिन्नत्वेपि तत्प्रतियोगितावच्छेदक धूमत्वादैक्येन स्वसमानाधिकरणा न्योन्याभाव प्रतियोगितानवच्छेदक तत्कत्वाद्यात्मक स्वव्यापक तत्कत्वरूप तदनतिरिक्तवृत्तित्वं धूमत्वादावक्षतमेवेति भावः ।

नच प्रतियोगितायाः प्रतियोगिस्वरूपतामते सामान्याभाव प्रतियोगितायाः विशेषाभावप्रतियोगितातो न भेदः, प्रतियोगिना मभेदात् ; तथाच वह्निमान् धूमादित्यादौ अव्याप्तिर्दुर्वारा, धूमसमानाधिकरण विशेषाभाव प्रतियोगिता कूटे वह्नित्वादे रवच्छेदकत्वात् ; तस्यच तदनतिरिक्तवृत्तित्वा दिति वाच्यम् । सामान्याभाव विशेषाभावयोः प्रतियोगित्वा भेदेपि सामान्याभावीय प्रतियोगिता त्वेनैव सामान्यधर्मा वच्छेद्यत्वात् , हेतु समानाधिकरणाभाव प्रतियोगितात्वावच्छिन्नावच्छेदकानतिरिक्तवृत्तित्व विवक्षणेना व्याप्तिनिरासात ।

स्वव्यापक तत्कत्व मित्यत्र स्वस्य व्याप्यता साध्यता वच्छेदकताघटकसम्बन्धेन, प्रतियोगितावच्छेदकस्य व्यापकता प्रतियोगितावच्छेदकताघटकसम्बन्धेनच बोद्धया; तेन सम्बन्धसामान्येन धूमत्वादिकं प्रति समवायादिना धूमत्वादे रव्यापकत्वेपि - समवायादिना वह्नित्वादिकं प्रति कालिकादिसम्बन्धेन घटत्वादे र्व्यापकत्वेपिच नक्षतिः । दण्डिमान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक दण्डादौ दण्डान्तरसमानाधिकरण भेदप्रतियोगितावच्छेदकत्वेपि तत्तद्दण्डादिव्यक्तौ तत्तद्दण्डादिसमानाधिकरण भेदप्रतियोगितानवच्छेदकत्वस्या क्षततया सर्वत्रैव दण्डादिव्यक्तौ प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्व मक्षतमेवेति नातिव्याप्तिः । दण्डाद्यवच्छिन्न

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

साध्यकसद्धेता वपीदृशरीत्या व्याप्तिरितितु नाशंकनीयम् , दण्डादौ साध्ये परंपरासम्बन्धेना खण्डस्य दण्डत्वादेरेव साध्यतावच्छेदकतायाः स्वीकृतत्वात् ।

नन्वेवमपि हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक वह्निघटो भयत्वा नतिरिक्तवृत्तितया वह्नित्वादे रवच्छेदकत्वं दुर्वारमेव । नचोभयत्वादे रुभयादिपर्याप्ततया प्रत्येकं तदत्यन्ताभाव स्तदवच्छिन्नभेदश्च वर्तते , अय मेकोनद्वाविति सर्वजन साधारणानुभवस्य दुरपह्नत्वात् , तादृशप्रतीते रेकत्वादौ द्वित्वाद्यवच्छेदकत्वाभावावगाहित्वोपगमे मूलावच्छिन्नो वृक्षो न कपिसंयोगी त्यादिप्रतीतेरपि मूलादौ कपिसंयोगाद्यवच्छेदकत्वा भावावगाहिता स्वीकारापत्तेः । यदि च तत्र बाधकाभावात वृक्षाद्यधिकरणक कपिसंयोगाद्यभावो विषय स्तदा प्रकृतेपि एकत्वाद्यवच्छिन्नाधिकरणक द्वित्वाभावादिविषयकत्वं दुर्वारमेव । एकत्वाद्यवच्छिन्ने द्वित्वादिमत्व प्रत्ययानुदयेन बाधकविरहस्यतुल्यत्वात् । प्रत्येक मुभयादौ द्वित्वाभावादिसत्वेपि द्वित्वादेः द्वित्वाभावानुयोगितानवच्छेदकतया द्वौ नद्वाविति प्रतीते र्दुरुपपादत्वात । द्वित्वादिसामानाधिकरण्यमात्रेण तदभावप्रत्ययस्येष्टत्वात् । नञ्पदेनाऽन्वयितावच्छेदकावच्छेदेन अभावबोधनात् , द्वित्वादिसामानाधिकरण्यमात्रावगाहिन्या अभावप्रतीतेः द्वौ न द्वावित्याकारताविरहात । तदाकारकप्रतीते रेवच अनुभवविरुद्धत्वात् । तथाच द्वित्वाद्यनतिरिक्तवृत्तिता कथं वह्नित्वादेरिति वाच्यम् । एवंसति वह्निघटोभयवान् धूमादित्यादौ साध्यतावच्छेदक द्वित्वादे रवच्छेदकतायाः दुरुपपादत्वात , प्रतियोगितावच्छेदकपदेन तादृशद्वित्वादिक मुपादायैव तस्यावच्छेदकानतिरिक्त वृत्तित्वस्यसम्पाद्यत्वात् , तस्यचोक्तरीत्या ऽसम्भवादिति स्वव्यापकतत्कत्वरूप तदनतिरिक्तवृत्तित्वघटक व्यापकतायां प्रतियोगिताऽव्यधिकरण त्वस्य भेदे निवेशनीयतया उभयत्वादावपि वह्नित्वनिरूपित तादृ-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वसमानवृत्तिकंचावच्छेदकं ग्राह्यं ।

शव्यापकताया अक्षतत्वेन तदवच्छेदकताप्रसंगस्य दुर्वारत्वात् । नहि प्रत्ये कवृत्तिरुभयत्वाद्यवच्छिन्न भेदः प्रतियोगिताव्यधिकरणः । उभयत्वादेःव्या सज्यवृत्तित्वेपि तदवच्छिन्नप्रतियोगितायाः अव्यासज्य वृत्तितया प्रत्येकमु भयत्वा द्यनधिकरणतावत्तदवच्छिन्न भेदप्रतियोगितानधिकरणत्वस्या सम्भवा दित्याशंक्य प्रतियोगितावच्छेदका नतिरिक्त वृत्तित्वघटकं अवच्छेदकं स्वसमानवृत्तिकत्वेन विशेषयति (स्वेति) तथाच वह्निघटो भयत्वादेः वह्नित्वादि समानवृत्तिकताविरहात् वह्नित्वादे स्तदनतिरिक्त-वृत्तित्वेपि न पारिभाषिका वच्छेदकतापत्तिरिति भावः ।

अत्र व्यापकताशरीरे स्वसमानाधिकरणत्वस्य स्वाधिकरणतावच्छेद-कावच्छिन्नाधिकरणताकत्व रूपस्याभाव विशेषणत्वोपगमेतु द्वित्वाद्यधिक रणस्य प्रत्येकं द्वित्वावच्छिन्नभेदाद्यधिकरणत्वेपि द्वित्वादेः द्वित्वादिव्याप कत्वं भेदे प्रतियोगितावैय्यधिकरण्य मनिवेश्यैवोपपादयितुं शक्यत-इति स्वसमानवृत्तिकत्व निवेशनमयुक्तम् । नचाव्याप्यवृत्तिधर्मा-वच्छिन्न प्रतियोगिताकभेदस्या व्याप्यवृत्तिता मते संयोगेन दण्डादे र्यत्र साध्यतावच्छेदकता तत्र व्यभिचारिणि हेतुसमानाधिकरणाभा व प्रतियोगितावच्छेदक दण्डादिक मादाय दण्डादिरूप साध्य-तावच्छेदके पारिभाषिकावच्छेदकत्वं व्यापकताशरीरे प्रतियोगिता वैयधिकरण्याप्रवेशे नस्यात् इति वाच्यम् । अव्याप्यवृत्ति दण्डा-दिक मादाय दण्डादेः पारिभाषिकावच्छेदकत्वा सम्भवेपि व्यभि-चारनिरूपकाधिकरण यत्किंचिद्व्यक्त्यवृत्तित्वरूप हेतुसमानाधिकर-णाभाव प्रतियोगितावच्छेदक मुपादाय दण्डादेः साध्यतावच्छेदकस्य तथात्वो पपादन सम्भवात् । तदवृत्तौ साध्ये तदवृत्तित्वावच्छिन्न भेदस्य कथ मप्यसम्भवादितितु चिन्तनीयम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्त्वंच स्वपर्याप्त्यधिकरणपर्याप्तवृत्तिकत्वं, यावत्त्वादिकन्तु न तथा । पर्याप्तिश्चायमेको घट इमौ द्वा—

ननु किमिदं समानवृत्तिकत्वं? यद्यन्यूनानतिरिक्त वृत्तित्वं, तदा अनतिरिक्तवृत्तित्वान्तर निवेशवैफल्यं, स्वान्यूनवृत्ति यत् तदनतिरिक्तवृत्तित्वस्य स्वस्मि न्नियतत्वात् । तार्णातार्णदहनो-भयत्वादिक मादाय दहनत्वादे रवच्छेदकत्वापत्तेश्च दुर्वारता । यदि चैकजातीयवृत्तित्वमेव तत्, तच्च स्वनिष्ठव्यासज्यवृत्तित्वा व्या-सज्यवृत्तित्वान्यतररूपवत्त्वं, द्वित्वादौच वह्नित्वादे र्नैतादृशसमानवृत्ति-कत्वं, वह्नित्वादे रव्यासज्यवृत्तित्वा दित्युच्यते । तथापि वह्निधूमो भयवान् धूमादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छे-दक वह्निधूमघट त्रित्वाद्यनतिरिक्तवृत्तितया साध्यतावच्छेदक द्वि-त्वादेः पारिभाषिकावच्छेदकतापत्ति दुर्वारैव, द्वित्वत्रित्वाद्यो रुभ-योरेव व्यासज्य वृत्तितया निरुक्तसमानवृत्तिकताया दुरपवादत्वात् इत्यत आह । (तत्त्वंचेति) स्वसमानवृत्तिकत्वंचेत्यर्थः । वह्निनिष्ठ यावत्त्व तार्णातार्णदहनोभयत्वादिक मादाय वह्नित्वादा वतिप्रसंगाभा-वं स्फुटयति (यावत्त्वादिक मिति) आदिना दर्शितद्वित्वादि परिग्रहः । 'नतथा'- नस्वपर्याप्त्यधिकरणपर्याप्तत्वरूप वह्नित्वादिनिरूपित समानवृत्तिकत्ववत् । वह्नित्वादेः प्रत्येकवह्न्यादौ पर्याप्तत्वात् तस्यचा तथात्वादिति शेषः । तथाच यावत्त्वादे र्धूमसमानाधिकरणाभावप्रतियो-गितावच्छेदकत्वेपि वह्नित्वाद्य न्यूनानतिरिक्तवृत्तित्वेपिच नक्षतिरिति भावः । ननु पर्याप्ति राश्रयत्वमेव, वह्नित्वादिसमानाधिकरण याव त्वादेः वह्नित्वादिपर्याप्त्यधिकरण पर्याप्तत्व मक्षतमे वेत्यत आह (पर्याप्तिश्चेति) "अय मेको घट" इत्यनेना व्यासज्य वृत्तिघटत्व वह्नित्वादीनां प्रत्येकमेव पर्याप्तिरिति दर्शितम् । "इमौ द्वावि" ति प्र-तीतिकथनेन व्यासज्य वृत्तिद्वित्वादीनां न प्रत्येकपर्याप्तिः, तथासति अय मेको द्वाविति प्रतीत्यापत्ते रिति दर्शितम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यद्यपि समुदाय पर्याप्तत्वेपि तदेकदेश प्रत्येकपर्याप्तत्वं अनपवादं, समुदायस्य एकदेशानतिरिक्तत्वात्, इति यावत्त्वादे वह्नित्वादिपर्याप्त्य धिकरणप्रत्येकवह्निपर्याप्तत्वं दुर्वारम् । तथापि स्वपर्याप्त्यवच्छेदकावच्छि न्नपर्याप्तिकत्वं मत्र विवक्षितमिति नदोषः । व्यासज्याव्यासज्य वृत्त्योः समानजातीयवृत्तिक धर्मावच्छिन्न पर्याप्तयो रेकधर्मिणि पर्याप्तिसत्वे प्येकधर्मावच्छिन्ने अपर्याप्तेः । अन्यथा – अयमेको वह्निरितिवत् अयमेको यावानिति प्रतीत्यापत्ते दुर्वारत्वात् ।

अथ–घटावित्यादौ यदि घटत्वादिसामानाधिकरण्यमात्रेण द्वित्वादिप र्याप्ति भासते,तदा आकाशावित्याकारक प्रतीतेरपि प्रमात्वापत्तिः, आकाश त्वादि सामानाधिकरण्येनात्माकाशोभयत्वादेः पर्याप्तत्वात्, अतस्तत्र धर्मि-तावच्छेदक घटत्वाद्यवच्छिन्न पर्याप्तेरेव विषयत्व मंगीकार्यम् । तथाचा व्यासज्यवृत्तेरपि द्वित्वावच्छेदकत्व मायातमिति व्यासज्यवृत्ते रव्या सज्यवृत्ति समानवृत्तिकत्वं दुर्वारमेव । नचानेकवृत्ते रव्यासज्यवृत्तेरपि व्यासज्यवृत्ति धर्मपर्याप्त्यवच्छेदकत्व मास्तां, तादृशधर्मस्यच नाव्या सज्यवृत्ति पर्याप्त्यवच्छेदकत्वं, किन्त्वेकैकमात्र वृत्तेरेवेति न व्यास-ज्याव्यासज्यवृत्त्यो रेकधर्मावच्छिन्न पर्याप्तत्व प्रसंग इति वाच्यम् । घटौ द्रव्यमित्यादिप्रतीत्या तथाविधघटत्वाद्यवच्छेदेन द्रव्यत्वादिप-र्याप्त्यवगाहनात् । एकमात्रवृत्तेरेवा व्यासज्यवृत्ति पर्याप्त्यवच्छेदक त्व मित्युक्त्यसम्भवात् । तत्र घटत्वादिसामानाधिकरण्य मात्रेण-द्रव्यत्वादिपर्याप्ति भासते, नतु तदवच्छेदेनेत्युक्तौ अय मेको घ-ट इत्यादावपि इदन्त्वादौ घटत्वादिपर्याप्त्यवच्छेदकताभाने विवाद-संम्भवेनाव्यासज्यवृत्तिधर्मपर्याप्ते रवच्छिन्नत्वस्यैवा प्रसिद्धिप्रसंगात, धूमत्वादि पर्याप्त्यवच्छेदकाप्रसिद्ध्या तत्रावच्छेदकलक्षणाव्याप्तिप्र-संगात । नच स्वपर्याप्त्यवच्छेदकताव्यापक पर्याप्त्यवच्छेदकताकत्व-मेव विवक्षणीयम्, अव्यासज्यवृत्तिपर्याप्त्यवच्छेदकैकमात्रवृत्तिधर्मे व्यासज्यवृत्तिपर्याप्त्यवच्छेदकताविरहात न तस्या व्यासज्यवृत्तिपर्या-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्त्यवच्छेदकताव्यापकत्व मिति व्यासज्याव्यासज्यवृत्त्यो र्नसमानवृत्तिकताप्रसंग इति वाच्यम् । एवं सति अनतिरिक्तवृत्तित्वनिवेश वैफल्यापत्तेः । न्यूनवृत्तिमहानसीय वह्नित्वादिपर्याप्त्यवच्छेदकतायाः वह्नित्वादिपर्याप्त्यवच्छेदकता व्यापकताविरहेणैव तादृशधर्म मुपादाय वह्नित्वादे स्वच्छेदकतापत्त्यसंभवात इतिचेन्न;- अनेकवृत्तिघटत्वादेर्द्वित्वादिघटत्वादिरूपैकैकमात्रवृत्तिधर्मावच्छिन्न पर्याप्तिकूटस्य घटनिष्ठपर्याप्तित्वादिरूपानुगत रूपावच्छिन्नस्या वच्छेदकत्व मेवोपपद्यते, नतु घटत्वावच्छिन्नं द्रव्यत्वादे र्यावद्घटादिषु पर्याप्त्यन्तरं, मानाभावात् । एकमात्रवृत्तिधर्मावच्छिन्नायाः पर्याप्ते स्वच्छेदकत्वस्यैव विवक्षणीयतया अनुगतरूपावच्छिन्न पर्याप्तिकूटावच्छेदकानेकवृत्तिधर्मावच्छिन्न पर्याप्ति मादाय व्यासज्यवृत्ते र्नाव्यासज्यवृत्तिसमानवर्तिकतापत्तिरिति ।

नच कालाकाशावित्यादिप्रतीत्या एकमात्रवृत्तिकालत्वाकाशत्वादेरपि द्वित्वादिपर्याप्त्यवच्छेदकत्वावगाहनात एकमात्रवृत्तिधर्माणामपि व्यासज्यवृत्तिधर्मपर्याप्त्यवच्छेदकतया तस्या व्यासज्यवृत्तिधर्मसमानवृत्तिकत्वं दुर्वारमितिवाच्यम् । तादृशप्रतीत्या तथाविधधर्मद्वयादौ व्यासज्यवृत्तेरेव द्वित्वादिपर्याप्त्यवच्छेदकताया अवगाहनात् । प्रकृतेचा व्यासज्यवृत्त्यवच्छेदकताया एव निवेशेनानातिप्रसंगात ।

अत्राहुः- अव्यासज्यवृत्तिघटत्वादीनां पर्याप्त्याख्यस्वरूपसम्बन्धान्तरेमानाभावः, समवायादिसम्बन्धेनैवोपपत्तेः । नच समवायस्यैक्येन पटादावपि घटत्वादिविशिष्ट बुद्धिप्रसंग इति प्रतिनियतप्रतियोगिक पर्याप्तिसम्बन्ध स्वीकारइतिवाच्यम् । प्रतिनियत प्रतियोगिकै कविधसम्बन्धेनैवोपपत्तेः द्विविधसम्बन्धासिद्धेः कथमप्यसम्भवात् । एवं द्वित्वादेरपि पर्याप्तिसमवायादि रूपसम्बन्धद्वयकल्पनमयुक्तम्, अनेकवृत्तिधर्मावच्छिन्नैक विधसम्बन्धेनैव निर्वाहात्

नच अयमेको द्वित्वसम्बन्धीति प्रतीतेः एकमात्रवृत्ति धर्मावच्छेदेनापि द्वित्वादेः सम्बन्धान्तरस्वीकार आवश्यक इति वाच्यं,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्रितिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषएव । त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः । घटकं चावच्छेदकत्वं स्वरूपसम्बन्धविशेषः ।

तादृशप्रतीतावपि एकत्वसामानाधिकरण्येन अनेकवृत्तिधर्मावच्छिन्न सम्बन्धस्यैव भानोपगमात् । द्वित्वादिप्रकारक तत्सम्बन्धसंसर्गक बुद्धावेव तत्सबन्धांशे धर्मितावच्छेदकावच्छिन्नत्व भाननियमात् । सम्बन्धप्रकारकोक्त बुद्धौ धर्मितावच्छेदक सामानाधिकरण्य मात्रावगाहिता सम्भवादिति । तथाच समवायातिरिक्तस्य संसर्गकोटा वनन्तर्भावे प्यतिप्रसंगवारण सम्भवः, स्वाधिकरणता वच्छेदका वच्छिन्नाधिकरणताकत्व रूपस्य स्वसमानवृत्तिकत्वस्य लक्षणे निवेशनीयत्वात् ।

व्यासज्यान्यासज्यवृत्तित्वा न्यतररूपेण सजतीयत्वरूप-समानवृत्तिकत्व मुपेक्ष्य स्वपर्याप्त्यधिकरण पर्याप्तत्वनि-वेशनस्य प्रयोजनं सूचयति (त्रित्वादिकमिति) " द्वित्वादिसमानवृत्ति-कं " - द्वित्वादिपर्याप्त्यधिकरण पर्याप्तवृत्तिकं । त्रयोद्वा वित्यादि प्रत्यय-विरहादिति भावः । "द्वित्वादिना" - वह्निधूमोभयत्वादिना । "नाव्याप्तिः"-न धूमादावव्याप्तिः । द्रव्ये द्रव्याणीत्यादि प्रतीत्याद्रव्यत्वाद्येकैक धर्म-स्य द्वित्वत्रित्वादिन्यूनाधिक वृत्तिसंख्यापर्याप्त्यवच्छेदकत्वेपि तादृश-धर्मस्य प्रत्येकतत्तत्पर्याप्त्यतिप्रसक्तत्वेना नुगमक यत्किंचिद्रूपाव-च्छिन्न पर्याप्तिकूटंप्रत्येवा वच्छेदकतया पूर्वविवक्षया सामंजस्यमि-ति ध्येयम् । आत्माश्रयशंकां निरस्यति (घटकंचेति) (स्वरूपसम्बन्ध विशेष) इति तादृशावच्छेदकताश्रयसमनियत लघुधर्मानतिरिक्त वृत्तित्व मादायैव कम्बुग्रीवादि मत्वादा ववच्छेदकत्वो पपा-दन सम्भवा दिति भावः । प्रतियोगिता धर्मिको भया-भावघटनापक्षे गुरुधर्मावच्छिन्नसाध्यकसद्धेतौ साध्यतावच्छेदका-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एवंच यद्धर्मावच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्ति धर्मावच्छिन्नेति वक्तव्यं, तेनोक्ता व्याप्तिनिरासः ।

वच्छिन्नत्वाप्रसिद्धिनिबन्धनामव्याप्तिं परिहरति (एवमिति) (यद्धर्मान्यूनवृत्तीति) तदन्यूनवृत्तित्वं तत्समानाधिकरणभेद प्रतियोगितानवच्छेदकत्वं, तत्र पूर्वोक्तयुक्त्या भेदे प्रतियोगितावैयधिकरण्यनिवेशाद्वह्निघट उभयत्वादे र्वह्नित्वा द्यन्यूनवृत्तित्व मक्षतमेवेति यद्धर्मपर्याप्त्यधिकरणपर्याप्तत्वमपि निवेश्यम् । अतो धूमसमानाधिकरणाभाव प्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्वसत्त्वेऽपि नक्षतिः। प्रतियोगितायाः प्रतियोगिभेदेन भेदे धूमादिसामान्याभावप्रतियोगितायां प्रत्येकं धूमत्वाद्यन्यूनवृत्तिताविरहेणातिव्याप्तिः, नानाप्रतियोगिवृत्तिप्रतियोगिताया ऐक्ये वह्निघटोभयत्वाद्यवच्छिन्न प्रतियोगितायां प्रत्येकपर्याप्तायां वह्नित्वादिपर्याप्त्यधिकरण पर्याप्तत्वसहितवह्नित्वाद्यन्यूनवृत्तित्व सत्त्वा दव्याप्तिः, अतः तदन्यूनवृत्तित्वमात्र मुपेक्ष्यान्यूनवृत्तिधर्मावच्छिन्नत्वपर्यन्तस्य उभयाभावप्रतियोगितायां निवेशः ।

अथात्र दण्डादिनानाव्यक्ति साध्यतावच्छेदकके व्यभिचारिविशेषे ऽतिव्याप्तिः, निखिलानामेव दण्डादिव्यक्तीनां दण्डादिरूपसाध्यतावच्छेदकसमानाधिकरणभेद प्रतियोगितावच्छेदकतया हेतुसमानाधिकरणदण्डाद्यवच्छिन्नाभाव प्रतियोगितायां तादृशभेदप्रतियोगितानवच्छेदकावच्छिन्नत्वाभावसत्वात् । तादृशभेदप्रतियोगितावच्छेदकतानवच्छेदकं यद्रूपं तद्रूपविशिष्टावच्छेद्यत्वाभावनिवेशे दण्डादिमन्निष्ठभेदप्रतियोगितानवच्छेदकतानवच्छेदक दण्डत्वादिविशिष्टावच्छेद्यत्वस्य दण्डादि सामान्याभावप्रतियोगितायां सत्वेन तत्रातिव्याप्तिपरिहारेऽपि —धूमवान् वह्ने रित्यादावतिव्याप्तिः, धूमाद्यभावप्रतियोगितायां लाघवेन स्वरूपत एव धूमत्वादे रवच्छेदकतया विशेषणान्तरविशिष्ट धूमत्वाद्यवच्छेद्यत्वाभावसत्वात् । नच विशेषणान्तरविशिष्ट धूमत्वाद्यवच्छेद्यत्वाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यम्, घटावृत्तिजातिमत्सामान्याभाव प्रतियोगितायामेव तत्प्रसिद्धेः। इति चेन्न; —

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दण्डाद्यात्मकसाध्यतावच्छेदकस्य साध्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वासम्भवेपि व्यभिचारनिरूपकाधिकरणं यत्र तद्वृत्त्यन्यत्वस्याखण्डस्य तथात्वात , तदवच्छेद्यत्वाभावस्यापि हेतुसमानाधिकरणाभाव प्रतियोगितासामान्ये असत्वेन दण्डादिसाध्यके ऽ नतिप्रसंगात ।

अथवा साध्यतावच्छेदकवन्निष्ठ भेदप्रतियोगितायां यादृशरूपावच्छिन्नत्वं नास्ति तादृशरूपावच्छिन्नत्वाभावस्य विवक्षणीयत्वात दण्डादिसाध्यके व्यभिचारिणि दण्डयादिनिष्ठप्रतियोगितायां तत्ताविशिष्टदण्डाद्यवच्छिन्नायां दण्डत्वादिविशिष्टावच्छेद्यत्वाभावसत्वात, दण्डयादि सामान्याभाव प्रतियोगितायां च तादृशाभावासत्वेनातिव्याप्त्यनवकाशात । अवच्छेदकतयो रेकसम्बन्धावच्छिन्नत्वं निवेश्य सम्बन्धभेदनिबन्धनो दोषो निरस्यः ।

सत्तावान् जाते रित्यादौ सत्तात्वादे र्हेतु समानाधिकरणाभाव प्रतियोगितावच्छेदक विशिष्टसत्तात्वाद्यनतिरिक्तवृत्तितया अव्याप्तिरिति प्रतियोगितावच्छेदका व्यभिचारित्वरूपस्य स्वव्यापकतत्कत्वरूपस्यच तदनतिरिक्तवृत्तित्वस्य निवेशो नसम्भवतीति यद्धर्मविशिष्टस्य प्रतियोगितावच्छेदक यत्किञ्चिद्धर्मावच्छिन्नाव्यभिचारिता प्रतियोगितावच्छेदक यत्किञ्चिद्रूपावच्छिन्नस्यवा यद्रूपविशिष्टव्यापकता तत्त्वरूपं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव निवेशनीयं। तावतैवच वह्निघटोभयत्वादिरूपप्रतियोगितावच्छेदक मादाय वह्नित्वादेः पारिभाषिकावच्छेदकत्व निरासः सम्भवति, वह्नित्वादिविशिष्टस्य तादृशोभयाद्यवच्छिन्न व्यभिचारित्वात , तादृशोभयत्वादे र्वह्नित्वादिविशिष्ट व्यापकतानवच्छेदकत्वाच्चेति प्रतियोगितावच्छेदके स्वसमानवृत्तिकत्व विशेषणं विनैव निर्वाहः; एवं यद्रूपान्यूनवृत्ति धर्मावच्छिन्नत्वाभावस्य प्रतियोगिताधर्मिकस्य व्याप्तिघटकतापक्षेपि तदन्यूनवृत्तित्वं यदि व्यापकत्वं तदा सत्तात्वव्यापकविशिष्ट सत्तात्वावच्छिन्नत्वस्य हे तुसमानाधिकरणाभाव प्रतियोगितायां सत्वादुक्तस्थल एवाव्याप्ति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभावव दसम्बद्ध स्वविशिष्टसामान्य कत्वम् ,

---

रिति तद्विशिष्टव्यापकतावच्छेदकत्व रूपं तदन्यूनवृत्तित्व मेव निवेश्यम् , तावतैव वह्निघटोभयत्वादेः वह्नित्वादिविशिष्ट व्यापकता नवच्छेदकतया धूमादिसमानाधिकरणाभाव प्रतियोगितायां तादृशोभयत्वाद्यवच्छिन्नत्व सत्वे प्यव्याप्त्यनवकाशात — यद्धर्मान्यूनवृत्ति धर्मे यद्धर्मसमानवृत्तिकत्व विशेषण प्रक्षेपमन्तरेणैव सामञ्जस्य मित्याशयेनाह "वस्तुतस्तिव" त्यादिना - (तदवच्छिन्नेति) तत्प दमनतिरिक्तवृत्तित्व प्रतियोगिभूत हेतुसमानाधिकरणाभाव प्रतियोगिता वच्छेदकत्व पर्याप्त्यधिकरणपरम् । स्वपदं अनतिरिक्तवृत्तित्वेनाभि मतपरम् । धूमत्वाद्यवच्छिन्नाभाववति मेयधूमत्वादिविशिष्टस्यासम्बद्धतया मेयधूमत्वादे रवच्छेदकत्वनिर्वाहः । धूमत्वाद्याश्रयमहानसीय धूमाद्यभाववति धूमत्वादिविशिष्टस्य सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या तद्धूमत्वादिरूपावच्छेदकभेदमादायातिव्याप्तिरिति तदाश्रय प्रतियोगित्वं परित्यज्य तदवच्छिन्न प्रतियोगिताकत्वमभावविशेषणमुपात्तम् । हेतुसमानाधिकरणाभाव प्रतियोगितायां यस्य येन सम्बन्धेनावच्छेदकता तेन सम्बन्धेनावच्छिन्नत्वं निवेशनीयम् , तेन विषयितया धूमत्वाद्यवच्छिन्नस्य ज्ञानादेरभाववति धूम त्वादिविशिष्ट धूमादेस्सम्बद्धत्वेपि न धूमत्वादेरवच्छेदकत्वानुपपत्तिः। उत्पत्तिकालावच्छेदेन धूमत्वाद्यवच्छिन्नाभाववति धूमत्वादिविशिष्टस्य संयोगरूपसाध्यतावच्छेदक सम्बन्धेन सम्बद्धतया तादृशं स्वंगुणत्वादि कमेवेति संयोगेन धूमादिसाध्यके व्यभिचारिण्यति प्रसंगस्य वारणाय प्रतियोगिवैयधिकरण्यमभावे विशेषणम् । धूमाद्यभावस्यापि ह्रदादौ प्रति योगिव्यधिकरणतया तदभाववारणासम्भवात् , साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिमद्वृत्तियोंयस्तद्भिन्नत्वानिवेशे संयोगेनावृत्ते गुणादे रवाभावस्य तद्भिन्नस्य प्रसिद्ध्या तद्वति धूमत्वादिविशिष्टस्य संयो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गेन सम्बद्धतया धूमत्वादेरवच्छेदकत्वानुपपत्त्या पूर्ववद्गुणत्वादेरे-वावच्छेदकत्वादतिव्याप्ति तादवस्थ्यम् , स्वपदेनानुयोगिभूताभावो पादाने संयोगेन साध्यतायां सद्धेतौ तादृशसम्बन्धेन गुणाद्यभाव प्रतियोगिनो अधिकरणाप्रसिद्ध्या तादृशाभावाप्रसिद्धे रव्याप्तिः , अतः प्रतियोगिवैयधिकरण्य विशिष्टाभावाधिकरणासम्बद्धत्वं वि-वक्षणीयम् । द्रव्यंगुणादित्यादौ हेतुसमानाधिकरणाभाव प्रतियो-गितावच्छेदक पृथिव्यन्यत्व विशिष्टद्रव्यत्वत्वाद्यवच्छिन्नाभाव प्रति-योग्यनधिकरणगुणादौ द्रव्यत्वत्वादिविशिष्टस्या सम्बद्धतया द्रव्य-त्वत्वादेरवच्छेदकत्वापत्तिरिति – प्रतियोगितावच्छेदकावच्छिन्न वैय-धिकरण्यमेव प्रवेश्यम् , तद्धर्मस्य तद्धर्मावच्छिन्नाभाव प्रतियोगि तावच्छेदकत्वेनोपादानं शिरोवेष्टनेन नासिकास्पर्शमनुकरोतीति तद्ध-र्मावच्छिन्न वैयधिकरण्यविशिष्टत्वमेव निवेशनीयम् । तद्धर्मावच्छिन्नान-धिकरणासम्बद्ध स्वविशिष्टसामान्यकत्वन्तु फलितार्थः । तद्धर्मावच्छिन्ना नधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन तदसंबन्धित्वम् , तेन गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरण समवायसम्बन्धावच्छिन्नाभाव प्रति योगितावच्छेदकगुणादिविषयक ज्ञानत्वाद्यवच्छिन्नस्य विषयतया द्रव्यादि सम्बद्धस्य सम्बन्धसामान्येनाधिकरणे नित्यगुणादौ गुणत्वादि विशिष्टस्या सम्बद्धत्वेपि न गुणत्वादेरवच्छेदकताप्रसंगः । एवंच महाकालो घटवान् , कालपरिमाणादित्यादौ उभयाभाव घटितप्रतियोगिवैयधिकरण्यशालि हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदक गगनत्वादि विशिष्टस्य साध्य-तावच्छेदकसम्बन्धेन सम्बन्धिनोप्रसिद्ध्या अव्याप्ते वारणाय सा-ध्यतावच्छेदक सम्बन्धसामान्ये तदवच्छिन्नप्रतियोगिकत्व यद्यदधिक-रणानुयोगिकत्वोभयाभावस्तत्तदधिकरणासम्बद्ध स्वविशिष्टसामान्य कत्वं विवक्षणीयम् । ईदृशंच स्वं तत्र गगनत्वादिकमेव प्रसिद्धमि-तिनाव्याप्तिः । तदसम्बद्धत्वंच तदनुयोगिक साध्यतावच्छेदकसम्बन्धाप्र तियोगित्वं, तेन संयोगादिसंबधेन घटत्वाद्यवच्छिन्नाभाववतिज्ञानकपा-लाद्यौ विषयित्व समवायादिना घटत्वादिविशिष्टस्य सम्बद्धत्वेपि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वह्निमान् धूमादित्यादौ नावच्छेदका प्रसिद्धिः । तादात्म्येन साध्यतायां साध्यतावच्छेदकसम्बन्धेन वृत्ते रप्रसिद्धया व्याप्ति स्स्यादि-त्यवृत्तित्व मुपेक्ष्या सम्बद्धत्वानुधावनम् । विशिष्टसत्तावान् जाते रित्यादौ हेतुसमाना धिकरणाभावप्रतियोगितावच्छेदका वच्छिन्नाभाववति गुणादौ विशिष्टसत्तात्वाद्याश्रयसत्तादेः सम्बद्धतया विशिष्टसत्तात्वादे रवच्छेदक त्वानुपपत्तिरिति स्वाश्रये असम्बन्धत्व मनिवेश्य स्वविशिष्टे तन्निवेशनम् ।

यद्यपि विशेष्यस्य तत्सम्बन्धित्वे विशिष्टे तदसम्बन्धित्वं दुर्घटम्, तथापि स्वविशिष्टप्रतियोगिकत्वाभावव त्तदवच्छिन्नाभावव दनुयोगिकसाध्यतावच्छेदकसम्बन्ध सामान्यकत्वस्य तदवच्छिन्नाभाव वदनुयोगिकसाध्यतावच्छेदक सम्बन्धप्रतियोगितावच्छेदकता पर्या-प्त्यधिकरणापर्याप्त विषयतापर्याप्त्यधिकरणत्वस्यवा विवक्षणीयतया न दोषः । स्वविशिष्टप्रतियोगिकत्वानिच विशिष्योपादाय तदभावकूट मेव निवेशनीयं, तेन मेयधूमत्वादि विशिष्ट प्रतियोगिकत्व त्वाव-च्छिन्नाभावस्य गुरुधर्मस्या भावप्रतियोगिता नवच्छेदकता मते अप्रसिद्धावपि नक्षतिः ।

वस्तुतो मेयधूमत्वविशिष्ट प्रतियोगिकत्वाभावस्य शुद्धधूमत्वादि प्रकारक ज्ञाननिष्ठविषयितासम्बन्धसाधारणत्वा द्धूमत्वादिविशिष्ट-प्रतियोगिकत्वत्वस्य लघुधर्मस्य नतत्प्रतियोगितावच्छेदकत्व सम्भव इति नमेयधूमत्वादिविशिष्टप्रतियोगिताकत्वत्वा वच्छिन्नाभावाप्रसिद्धि रिति सामान्यत एकाभावनिवेशोपि सम्भवतीति ध्येयम् ।

येन रूपेण यस्य यद्धर्मिसम्बन्धिता तदन्यरूपावच्छिन्ने तत्र त-त्सम्बद्धत्वाभावसत्व मभ्युपेत्यवा एतल्लक्षणम् । द्वितीयलक्षणंच तदनभ्युपगमेन । धूमादिसमानाधिकरणाभाव प्रतियोगितावच्छेदक महानसीयवह्नित्वावच्छिन्नाद्यभाववति वह्नित्वादिविशिष्ट महानसी-यवह्न्यादे रसम्बद्धतया वह्नित्वादा वतिप्रसंगवारणाय सामान्यपदम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अथ – साध्यतावच्छेदक संयोगादिसम्बन्धेन घटत्वाद्यवच्छि न्नाभाववति कालिकादिसम्बन्धेन घटत्वादिविशिष्टस्य पटादेः संयोगादिसम्बन्धेन सम्बद्धत्वा दवच्छेदकाप्रसिद्धिः । साध्यताव च्छेदकताघटकसम्बन्धेन स्ववैशिष्ट्यनिवेशेपि कालिकसम्बन्धेन घटत्वादिविशिष्टस्य कालिकसम्बन्धेन साध्यतायां महाकालपरिमाणादि हेतुके अवच्छेदकाप्रसिद्धि दुर्वारैव । गगनत्वाद्यवच्छि न्नाभाववति काले कालिकसम्बन्धेन गगनत्वादिविशिष्टस्य स्पन्दादेः कालिकसम्बन्धेन सम्बद्धत्वात् । प्रतियोगितावच्छेदकता वच्छेदकसम्बन्धेन वैशिष्ट्यनिवेशे घटत्वादि समनियता समवेतगुरुधर्मस्य यत्र साध्यतावच्छेदकता तत्र तादृशधर्मस्य घटत्वादिक मादाय ऽवच्छेदकत्वा नुपपत्तिः, घटत्वादे स्समवायेन घटाद्यभाव प्रतियोगितावच्छेदकत्वा त्तत्सम्बन्धेन च तद्धर्मविशिष्टा प्रसिद्धेरिति चेन्न ;– यत्किंचि त्सम्बन्धेन स्वविशिष्टसामान्ये असम्बद्धत्व निवेशनेन सामञ्जस्यात् ।

नचैवं-वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगिता वच्छेदक घटत्वाद्यवच्छिन्नाभाववति विषयितासंबन्धेन वह्नित्वविशिष्टस्य साध्यतावच्छेदकसंयोगेना सम्बद्धत्वात वह्नित्वादेः, गुणवान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक सविषयकत्वाद्यवच्छिन्नाभाववति घटादौ विषयितया गुणत्वादिविशिष्टस्या समवेतत्वात् गुणत्वादे रवच्छेदकत्वापत्त्या अव्याप्तिरिति वाच्यम् । सध्यताव च्छेदके तादृशपारिभाषिकावच्छेदकता शून्यत्वमनिवेश्य साध्यतावच्छेद कता घटकसम्बन्धेन साध्यतावच्छेदकावच्छिन्न निरूपिताधिकरणत्वांशे साध्यसामानाधिकरण्य घटके पारिभाषिकावच्छेदकता घटकसम्बन्धेन तादृशावच्छेदकावच्छिन्ना निरूपितत्वस्य निवेशनीयतया विषयितया वह्नित्वादे रवच्छेदकत्वेपि समवायरूप साध्यतावच्छेदक

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

साघटक सम्बन्धेनं वह्नित्वाद्यवच्छिन्न निरूपिताया मधिकरणतायां विषयितासम्बन्धेन वह्नित्वाद्यवच्छिन्न निरूपितत्वाभावसत्वेन लक्ष-णसमन्वयात । गुरुधर्मस्यापि प्रतीतिबलेना धिकरणता निरूपक तावच्छेदकत्वोपगमा न्न गुरुधर्मावच्छिन्न साध्यकस्थले साध्यतावच्छेदका वच्छिन्नाप्रसिद्धिः ।

अथवा - अवच्छेदकता घटकसंबन्धेनावच्छेदक विशिष्टावृत्ति विषयिताकत्वं साध्यतावच्छेदकता वच्छेदकसम्बन्धेन साध्यताव-च्छेदक विशिष्टविशेषण मंगीकार्यम् । समवायसम्बन्धेन वह्नित्वादि विशिष्टस्य या विषयता तस्या स्सम्बन्धान्तरेण वह्नित्वादि विशि ष्टनिष्ठविषतान्यतया नाव्याप्त्यवकाशः । स्वरूपसम्बन्ध रूपावच्छेदक ता प्रवेशमतेपि ईदृशरीतिरेवा दरणीया , अन्यथा - वह्नित्वादिध-र्मिकानवच्छेदकत्वादि ग्रहस्य वह्नित्वाद्यवच्छिन्न विधेयकानुमिति हेतुत्वे धर्मितावच्छेदकतया वह्नित्वत्वादिविषयताया हेतुतावच्छेदककोटौ निवेशा द्गौरवस्य वह्नित्वत्वाद्यनुपस्थितिदशायां वह्निमानित्याकारका नुमित्यनुपपत्तेश्च दुर्वारत्वात ।

अत्रच - यत्किंचिद्धेत्वधिकरणासम्बद्ध स्वविशिष्टसामान्यक-त्वस्य लघो रवच्छेदकान्तार्थत्व सम्भवे हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक यत्किंचिद्धर्मावच्छिन्नाभावव दसम्बद्ध स्व-विशिष्टसामान्यकत्वस्य गुरुतरस्य निवेशनं मूलोपात्तप्रतियो-गितान्तस्य यथाश्रुतार्थकत्वानुरोधेन । अन्यथा ऽवच्छेद कान्तसमु दायस्य पारिभाषिकैकपदतापत्तेः । यथा निरुक्तावच्छेदकतानि-वेशे अवच्छेदकपदस्यैवा वच्छेदकावच्छिन्नाभाववदसम्बद्ध स्व-विशिष्टसामान्यकत्वे पारिभाषिकत्वं तद्वत ।

अत्र - जातिमान् मेयत्वादित्यादौ जातित्वादे रवच्छेदकत्वा नुपपत्तिः , हेतुसमानाधिकरणाभाव प्रतियोगिता वच्छेदकीभूत-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वविशिष्टसम्बन्धि निष्ठाभावप्रतियोगिता नवच्छेदकतत्कत्वं वा तदनातिरिक्तवृत्तित्वं वक्तव्यम् ।

यद्धर्मावच्छिन्नाभाववति साध्यतावच्छेदक समवाय सम्बन्धेन सम्बद्धत्वप्रसिद्धिः तद्धर्मावच्छिन्नाभाववति जातित्वादिविशिष्टस्यापि समवेतत्वात, जातित्वाद्यवच्छिन्नाभाववति च समवेतत्वस्यैवाप्रसिद्धया तदभाववदसमवेतत्वस्य जातित्वादिविशिष्टादौ दुर्निरूपत्वात् । एवं यथाश्रुते विशिष्टसत्तावान् जातेरित्यादौ विशिष्टसत्तात्वादेरपि अवच्छेदकत्वानुपपत्तिरतोऽन्यथानतिरिक्तवृत्तित्वं निर्वक्तिः (स्वविशिष्टेति) हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक शुद्धधूमत्वादे र्मेय धूमत्वादिविशिष्टसंबन्धिनिष्ठाभाव प्रतियोगितानवच्छेदकतया मेयधूमत्वादे रवच्छेदकत्वोपपत्तिः । जातिमान् मेयत्वादित्यादौ मेयत्वसमानाधिकरणाभाव प्रतियोगितावच्छेदक जातित्वादेः जातित्वविशिष्टसमवायिनिष्ठाभाव प्रतियोगितानवच्छेदकतया तस्य तथात्वोपपत्तिः । विशिष्टसत्तावान् जातेरित्यादौ द्रव्यत्वत्वविशिष्टसत्तात्वादेः विशिष्टसत्तात्वाश्रय सम्बन्धिगुणादिनिष्ठाभाव प्रतियोगितावच्छेदकत्वेपि विशिष्टसत्तात्वादिं विशिष्टसम्बन्धिद्रव्यादिनिष्ठाभावप्रतियोगितानवच्छेदकत्वात विशिष्टसत्तात्वादे रवच्छेदकतानिर्वाहः । सम्बन्धित्वं साध्यतावच्छेदकसम्बन्धेन बोद्धव्यं, तेन घटत्वादे विषयितादिसम्बन्धेन घटत्वादिविशिष्टसम्बन्धिज्ञानादिनिष्ठाभाव प्रतियोगितावच्छेदकत्वेपि नावच्छेदकाप्रसिद्धिः ।

अथैवं – महाकालो घटवान् कालपरिमाणादित्यादौ अवच्छेदकाप्रसिद्धिः, साध्यतावच्छेदकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनोऽप्रसिद्धया स्वपदेन गगनत्वाद्युपादानासम्भवात् ।

नच – सम्बन्धसामान्येन स्वविशिष्टसम्बन्धिनिष्ठः - सम्बन्धसामान्येन प्रतियोगिन्यधिकरणाभावोनिवेश्यः, विषयितया गगनत्वा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दिविशिष्टसम्बन्धिनि तद्विषयकज्ञानादौ सम्बन्धसामान्येन प्रतियोगिव्यधिकरणस्य तादृशज्ञानासमानकालिक तत्तद्घटाभावादेः प्रतियोगितायां गगनत्वादे रनवच्छेदकत्वा दुक्तस्थले गगनत्वादिक मवच्छेदकं प्रसिद्ध्यति, तादृशज्ञानादौ कालिकसम्बन्धेन गगनादे रभावसत्त्वेपि तस्य विषयितासम्बन्धेनैव प्रतियोगिसमानाधिकरणतया सम्बन्धसामान्येन प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम् । वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक ज्ञानत्वादेः वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकतया वह्नित्वादे रवच्छेदकत्वापातात । ज्ञानत्वाद्यवच्छिन्नाभावस्य विषयतासम्बन्धेन प्रतियोगिसमानाधिकरणतया लक्षणाघटकत्वात ।

नच तादात्म्यसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठ भेदप्रतियोगितानवच्छेदकत्वं विवक्षणीयम् , कालो घटवान् कालपरिमाणा दित्यादौ गगनत्वादौ गगनत्वादि विशिष्टाभिन्ननिष्ठ भेदप्रतियोगितानवच्छेदकत्वात् गगनत्वादिक मवच्छेदकमिति वाच्यम् । सत्तावान् जाते रित्यादौ तादात्म्येन सत्तात्वादिविशिष्टसम्बन्धिनि सत्तादौ यो भेदः तत्प्रतियोगितानवच्छेदकत्वस्य विशिष्टसत्तात्वादौ सत्वेन सत्तात्वादे रवच्छेदकत्वापातात् । तादात्म्यसाध्यतावच्छेदकान्यतरसम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य निवेशेपि घटत्वाभाववान् घटान्यत्वा दित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकघटत्वाभावान्य वृत्तित्वविशिष्ट घटत्वाभावत्वादे रन्यतरसम्बन्धेन घटत्वाभावत्वादिविशिष्ट सम्बन्धिनिष्ठस्या न्यतरसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वा दव्याप्त्यापत्तेः । घटत्वाभावत्वादिविशिष्ट सम्बन्धिनि पटादौ घटत्वाभावान्य वृत्तित्वविशिष्ट घटत्वाभावत्वाद्यवच्छिन्नस्य साध्यतावच्छेदकसम्ब-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

न्धेन सत्त्वात्, घटत्वाभावेच तदवच्छिन्नस्य तादात्म्यसम्बन्धेन सत्त्वात्; तन्निष्ठतदभावस्यान्यतरसम्बन्धेन प्रतियोगिसमानाधिकरणत्वात् ।

एतेन - यत्किंचित्सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठो य स्तेन सम्बन्धेन प्रतियोगिव्यधिकरणो ऽभाव स्तत्प्रतियोगितानवच्छेदकत्वविवक्षापि निरस्ता, तादात्म्येन सत्तात्वाद्यवच्छिन्नं प्रति तत्सम्बन्धेन विशिष्टसत्तात्वाद्यवच्छिन्नस्य व्यापकतया उक्तस्थले सत्तात्वादेरवच्छेदकताया दुर्वारत्वात् । कालिकसम्बन्धेन वह्नित्वाद्यवच्छिन्नं प्रति तेन सम्बन्धेन घटत्वाद्यवच्छिन्नस्य व्यापकतया वह्निमान् धूमादित्यादौ वह्नित्वादे रवच्छेदकत्वापाताच्च ।

नच येन येनसम्बन्धेन योयस्स्वविशिष्टसम्बन्धी तेन तेन सम्बन्धेन प्रतियोगिव्यधिकरणोय स्तन्निष्ठोभाव स्तत्प्रतियोगितानवच्छेदकत्वं विवक्षणीयं, संयोगसमवायादिना वह्नित्वसत्तात्वा द्यवच्छिन्नंप्रति तेनसम्बन्धेन घटत्वविशिष्टसत्तात्वा द्यवच्छिन्नस्या व्यापकतयाच नोक्तदोषावकाशइति वाच्यम्, एवं सति विषयितासम्बन्धेन कम्बुग्रीवादिमत्त्वादि विशिष्टसम्बन्धिनि तेन रूपेण घटाद्यवगाहिनि घटत्वाद्यप्रकारकज्ञानादौ विषयितया घटत्वादिविशिष्टस्यासत्त्वेन घटत्वादेः तेनसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न व्यधिकरणाभाव प्रतियोगितावच्छेदकतया घटत्वादिकमादाय कम्बुग्रीवादिमत्वादेः अवच्छेदकत्व निर्वाहासम्भवात् ।

नच हेतुसमानाधिकरणाभावीय यत्किञ्चित्प्रतियोगितायां यदवच्छेदकं तेन सम्बन्धेन स्वविशिष्टसम्बन्धिनिष्ठस्य तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकत्वं तस्य वाच्यम्, घटवान् कालपरिमाणादित्यादौ तादात्म्यं विषयिताश्च तादृशसम्बन्धमादाय गगनत्वादे रवच्छेदकत्वं संगमनीयं, विशिष्टसत्तात्वादे र्गुणादिनिष्ठभेदप्र-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तियोगितायां गौरवेण नावच्छेदकत्वं – अपितु शुद्धसत्तात्वादे रेवेति-हेतुसमानाधिकरण तादृशभेदस्य साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसमानाधिकरणत्वेन तदुपादानासम्भवात् – सत्तावान् जातेरित्यादौ यत्सम्बधेत्यनेन तादात्म्यसम्बन्धमुपादायसत्तात्वादे र्नावच्छेदकताप्रसंगः, वह्निमान्धूमादित्यादौ संयोगरूप साध्यतावच्छेदकसम्बन्ध धर्मिकोभयाभाव घटितप्रतियोगिवैयधिकरण्यशालिनः उत्पत्तिकालावच्छेदेन धूमाधिकरणवृत्तेः समवायसम्बन्धावच्छिन्नाभावस्य प्रतियोगितावच्छेदकं रूपत्वादिकं – वह्नित्वादिविशिष्टसमवायिनिष्ठस्य समवायेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं – अतोवह्नित्वादे रवच्छेदकत्वापत्तिरिति प्रतियोगितावच्छेदकसम्बन्धं परित्यज्य साध्यतावच्छेदकसम्बन्धः प्रतियोगिवैयधिकरण्यशरीरे निवेशितः, तथाच सति संयोगसम्बन्ध धर्मिकोभयाभाव घटितप्रतियोगि वैयधिकरण्यशालिनो रूपत्वाद्यवच्छिन्नाभावस्य वह्नित्वादिविशिष्टसम्बन्धिनि सत्वान्नायं दोष इति वाच्यम् । वह्निद्व्यणुकत्वादे र्यत्र संयोगेन साध्यतायामवच्छेदकता तत्र तदवच्छिन्न समवायितेजः परमाणौ समवायसम्बन्धावच्छिन्नरूपत्वाद्यवच्छिन्नाभावासत्वेन तत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वस्य कालविशेषावच्छेदेन हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकरूपत्वादौ सत्वेन साध्यतावच्छेदकस्यावच्छेदकताप्रसंगात् ।

यत्तु स्वविशिष्टप्रतियोगिकत्व तदवच्छिन्नाभावव दनुयोगिकत्वोभयाभाववत्साध्यतावच्छेदकसम्बन्धसामान्यकत्वस्य विवक्षणीयत्यानकश्चिद्दोषः, जातिमान् मेयत्वादित्यादौ जातित्वाद्यवच्छिन्नाभाववत्समवेतत्वाप्रसिद्धावपि जातित्वादि विशिष्टप्रतियोगिकत्व तादृशाभाववदनुयोगिकत्वोभयाभावस्य समवायसामान्येसत्वेन जातित्वादे रवच्छेदकत्वोपपत्तेः, कालोघटवान् कालपरिमाणादित्यादौ कालिकसम्बन्धेन गगनत्वादिविशिष्टसम्बन्ध्य प्रसिद्धावपि तादृशसम्बन्धसामान्ये गगनत्वादिविशिष्टप्रतियोगिकत्व तदवच्छिन्नाभाववदनुयोगिकत्वोभयाभाव-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सत्त्वेन गगनत्वादे रवच्छेदकता निर्वाहादिति । तत्र, तावता प्रथमलक्षणस्यैव परिष्कारेण द्वितीयलक्षणानुसरणानुपपत्तेः ।

अत्रवदन्तिं- साध्यतावच्छेदकसम्बन्धेन यदवच्छेदकविशिष्टसम्बन्धिनो प्रसिद्धिर्यत्र तदवच्छिन्नाभाववदसम्बन्ध स्वविशिष्टसामान्यकत्वमेव तत्र तदवच्छेदकत्वं, तेन घटवान् कालपरिमाणादित्यादौ गगनत्वादाववच्छेदकत्वप्रसिद्धिः, यदवच्छेदकविशिष्टे तदवच्छिन्नाभाववति साध्यतावच्छेदक सम्बन्धेन सम्बद्धत्वाप्रसिद्ध्या तदभावोदुर्निरूपः तत्रावच्छेदकत्वं स्वविशिष्टत्यादिरूपं, तेन जातिमान्मेयत्वादित्यादौ जातित्वादे रवच्छेदकत्वोपपत्तिः, सर्वसाधारणस्य एकविधावच्छेदकत्वस्य दुर्वचत्वेपिनक्षतिः, वाकारो व्यवस्थित विकल्पार्थकइति ।

अत्रेदं चिन्त्यते - ईदृशावच्छेदकत्वयो रभावद्वयविषयकं ज्ञान मनुमिति हेतुः, प्रत्येकाभावज्ञानस्यवा वैकल्पिकी कारणता ? आद्ये कालो घटवान् कालपरिमाणा दित्यादौ भ्रमं विना अनुमित्यनुपपत्तिः, द्वितीयस्या वच्छेदकत्वस्या सिद्धेः । द्वितीये जातिमान् मेयत्वा दित्यादौ प्रथमनिरुक्तावच्छेदकत्वाभावस्य जातित्वे ऽबाधितत्वात तज्ज्ञाना द्भ्रमं विनैवानुमित्यापत्तिः ।

नच साध्यसाधनभेदेन कार्यकारणभेदस्या वश्यकत्वात कालिकसम्बन्धेन घटादिसाध्यक कालपरिमाणादिहेतुकानुमितौ प्रथम निरुक्तावच्छेदकत्वाभावज्ञानस्यैव - मेयत्वादिलिंगकजात्याद्यनुमितौच चरमनिरुक्तावच्छेदकत्वाभावज्ञानस्यैव हेतुतास्वीकारा न्नोक्तदोषद्वया वकाश इति वाच्यम् । साध्यसाधनभेदेना नुमितिव्याप्तिज्ञानयोः कार्यकारणभावभेदेपि एकसाध्यसाधनस्थले यादृशज्ञाना दनुमिति स्तादृशज्ञानसत्त्वे ऽन्यत्रानुमित्यनुत्पादस्या नुभवविरुद्धतया प्रथम निरुक्तावच्छेदकत्वाभावज्ञानात कालो घटवान् कालपरिमाणा दित्य त्रानुमितिस्वीकारे तादृशज्ञाना न्मेयत्वादिलिंगकजात्याद्यनुमिते रवश्यं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वीकरणीयत्वापातात । अन्यथा सद्धेतुकानुमितौ वह्निव्याप्तिवार-णायोपात्त प्रतियोगितावच्छेदकावच्छिन्नत्वाद्यंशाविषयक ज्ञानस्यैव लाघवेन हेतुतापत्तिः । मेयत्वादिलिंगक जात्याद्यनुमितौ चरमनिरुक्तावच्छेदकत्वाभाव ज्ञानस्यैव हेतुत्वे समवेतमात्रमेव सकलहेतुमत्ति समवेतमिति भ्रमदशायां अनुमित्युपपादनासम्भवश्च, तदानीं समवेत वृत्तितया गृहीतघटत्वादिविशिष्ट व्यापकतावच्छेदके हेतुव्यापकता वच्छेदकत्वग्रहा दसमवेतवृत्तितया गृहीतगगनत्वादिविशिष्टस्य सम वायेन सम्बन्धिताया दुर्ग्रहत्वात् स्वविशिष्टत्यादिरूपावच्छेदकत्वस्य क्वचिदपि गृहीतु मशक्यत्वात , वृत्तिमन्मात्रमेव महाकाले कालिकसम्बन्धेन वर्तत इति निश्चयदशायां महाकालत्वादिहेतुकघटाद्यनुमितेरिव तदानीं मेयत्वादिलिंगकजात्याद्यनुमिते र्दुरपह्नवत्वात इति ।

इदन्तु तत्वम् , यद्रूपावच्छिन्नस्य येन सम्बन्धेन सम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकं तेन सम्बन्धेन तद्रूपावच्छिन्नविशिष्टा वृत्तिविषयतावान् यः साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नविशिष्ट स्तद्वृत्तित्वं व्याप्तिः । धूमवान् वह्ने रित्यादौ हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदकं धूमत्वादिकं संयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नसम्बन्धिनिष्ठस्य तत्सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं, साध्यतावच्छेदकीभूत तादृशसम्बन्धेन धूमत्वाद्यवच्छिन्न विशिष्ट निष्ठविषयताच न तेन सम्बन्धेन धूमत्वाद्यात्मक तद्रूपावच्छिन्नविशिष्टा वृत्तिरिति नातिप्रसंगः । महाकालो घटवान् कालपरिमाणादित्यादौ साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरण हेतुसमानाधिकरणाभावस्य प्रतियोगितावच्छेदकं गगनत्वादिकमेव - तादात्म्यादिना तद्विशिष्टसम्बन्धिनि वर्तमानस्य तेन सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं, तेन सम्बन्धेन तदवच्छिन्नविशि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ष्टा वृत्तित्वंच कालिकसम्बन्धेन घटत्वाद्यवच्छिन्नविशिष्टनिष्ठ विषयताया इति लक्षणसमन्वयः। धूमादिसमानाधिकरणस्य साध्यतावच्छेदकसंयोगादि सम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितावच्छेदकं ज्ञानत्वादिकं वह्नित्वादिविशिष्टसम्बन्धिनिष्ठस्य सम्बन्धसामान्येन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं, ज्ञानाद्यभावस्य विषयतासम्बन्धेन प्रतियोगिसमानाधिकरणत्वादिति- वह्नित्वादे रवच्छेदकत्वप्रसंग इत्यत स्तेन सम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशनम् । संयोगादिना वह्न्यादिमन्निष्ठो ज्ञानाद्यभावश्च संयोगादिसम्बन्धधर्मिक उभयाभावघटित प्रतियोगिवैयधिकरण्याश्रय इति नदोषः । साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशे, काल स्सर्ववान् मेयत्वा दित्यादौ सर्वत्वस्या वच्छेदकत्वोपपत्तये उभयाभावघटितस्यैव प्रतियोगिवैयधिकरण्यस्य निवेशनीयतया तादात्म्यादिना गगनादिसम्बन्धि गगनादिनिष्ठ गगनाद्यभावस्य कालिकसम्बन्धर्मिको भयाभावघटित प्रतियोगिवैयधिकरण्यशालितया कालो घटवान् महाकालत्वादित्यादौ अवच्छेदकाप्रसिद्धि तादवस्थ्यमिति तादृशसम्बन्धेन तन्निवेशितम् । सत्तावान् जाते रित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदक विशिष्टसत्तात्वादे स्सत्तात्वविशिष्ट सम्बन्धिनिष्ठ प्रतियोगिव्यधिकरणाभाव प्रतियोगितानवच्छेदकतया सत्तात्वादे रवच्छेदकत्वापत्तिः, अतः प्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिवैयधिकरण्यमेव निवेशनीयम् ।

नच सर्वत्वावच्छिन्नस्य यत्र विषयितासम्बन्धेन साध्यता ज्ञानत्वादिकं हेतुः तत्रसर्वत्वस्य पारिभाषिकावच्छेदकत्वानुपपत्तिः, सर्वत्वविशिष्टस्य विषयितासम्बन्धेन सम्बन्धिनि सर्वविषयकज्ञाने तेनसम्बन्धेन प्रतियोगिव्यधिकरणाभावा प्रसिद्धेरिति वाच्यम् ; घटत्वाद्यवच्छिन्नाविषयके सर्वत्वावच्छिन्नविषयके ऽस्मदादिज्ञाने घटत्वाद्यवच्छिन्नाभावस्यैव प्रतियोगितावच्छेदक सम्बन्धेन प्रतियोगितावच्छेदक

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अतएव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभाव प्रतियोगिता-वच्छेदक गुणान्यत्वविशिष्टसत्तात्व तुल्यवृत्तिकत्वेऽपि सत्तात्वस्य -

---

घटत्वावच्छिन्नव्यधिकरणतया सर्वत्वस्य तादृशाभाव प्रतियोगितानव-च्छेदकत्वेन सर्वत्वस्यावच्छेदकत्वोपपत्तेः ।

नचैवमपि यत्र नित्यत्वविशिष्टसर्वत्वं साध्यतावच्छेदकं तत्रज-न्यज्ञानस्य साध्यतावच्छेदकीभूत स्वविशिष्टासम्बन्धित्वात् नित्यज्ञाने च अभावस्य प्रतियोगितावच्छेदकावच्छिन्न वैयधिकरण्यस्या प्यस-म्भवात् तादृशसाध्यतावच्छेदके पारिभाषिकावच्छेदकत्वानुपपत्तिरिति वाच्यम्, नित्यत्वानधिकरणे नित्यत्वविशिष्टसर्वमितिज्ञाने विषयितया-नित्यत्व विशिष्टसम्बन्धितायाः अनपायात् । तत्रतदसत्त्वे तुल्ययुक्त्या जन्यत्वविशिष्टस्य घटादेरपि ईश्वरज्ञानासम्बन्धितया तादृशविशिष्टा-भावस्यैव ईश्वरज्ञानेविशिष्ट प्रतियोगिव्यधिकरणस्य सुलभत्वसम्भवात् । अन्यत्सर्वं पूर्ववद्बोध्यम् ।

यद्रूपावच्छिन्नस्य येनसम्बन्धेन सम्बन्धिनिवर्तमानस्य तेनसम्बन्धेन प्रतियोगिव्यधिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणा भाव प्रतियोगितावच्छेदकं तत्सम्बन्धिनिष्ठ तद्रूपावच्छिन्न प्रतियोगिकत्व भिन्नं यत्साध्यतावच्छेदकावच्छिन्न प्रतियोगिकत्वं तद्वत्साध्यतावच्छेदक सम्बन्धि सम्बन्धोवाव्याप्तिः । प्रतियोगित्वाद्यन्तर्भावा सहिष्णुतायां यद्रूपावच्छिन्नस्य यादृशसम्बन्धेनासम्बन्धित्वं हेतुमतस्तादृश सम्बन्ध निष्ठ तद्रूपावच्छिन्न प्रतियोगिताकत्वभिन्नत्वमेव साध्यतावच्छेदकाव-च्छिन्न प्रतियोगिकत्वे निवेशनीयमितिदिक् ।

यथाश्रुता नतिरिक्तवृत्तित्व पदार्थपरित्यागप्रयोजनं स्वयमेवदर्श-यति (अतएवेति) ईदृशानतिरिक्तवृत्तित्व निवेशादेवेत्यर्थः (वि-शिष्टसत्तात्व तुल्यवृत्तिकत्वेपीति) स्वव्यापक स्वपर्याप्त्यधिकरण

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नक्षतिः । एवं स्वविशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितानवच्छेदकाव-च्छेद्यत्वं बोध्यं ।

पर्याप्तविशिष्ट सत्तात्वकत्त्वेपीत्यर्थः । " नक्षतिः " –नसत्तात्वादे रव-च्छेदकत्वापत्तिः । प्रतियोगिताधर्मिको भयाभावघटितव्याप्तिपक्षे वि-शिष्टसत्तात्वादे स्सत्तात्वाद्य न्यूनवृत्तितामादाया व्याप्तिवारणाय व्याप कत्वं परित्यज्यान्यादृशं मन्यूनवृत्तित्वं निवेशयति (एव-मिति) (स्वविशिष्टेति) स्वपदं साध्यतावच्छेदकपरं, तथाच प्र-तियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरण हेतुसमानाधिकर-णाभाव प्रतियोगितासामान्यवृत्ति तत्सम्बन्धावच्छेद्यत्व स्वविशिष्टसम्ब-न्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वोभयाभावकत्वं तेन स-म्बन्धेन व्यापकतावच्छेदकत्वं बोध्यमित्यर्थः । विशिष्टसत्तात्वादे र्वि-शिष्टसत्तात्वाश्रयसम्बन्धि गुणादिनिष्ठाभाव प्रतियोगितावच्छेदकतया तदनवच्छेदकसत्तात्वा द्यवच्छेद्यत्वाभावस्य जातिसमानाधिकर-णाभाव प्रतियोगितायां सत्वेन विशिष्टसत्तावान् जातेरित्यादावति-व्याप्ति रतस्स्वविशिष्टेति । स्ववैशिष्ट्यञ्च साध्यतावच्छेदकता घट-कसम्बन्धेन बोध्यं, अन्यथा – धूमवान् वह्नेरित्यादौ कालिकादिसम्ब-न्धेन धूमत्वादिविशिष्ट वह्न्यादिसंयोगिनिष्ठाभावप्रतियोगितायां धूमत्वा देरवच्छेदकतया तदनवच्छेदक द्रव्यत्वाद्यवच्छेद्यत्वाभावस्य हेतुस-मानाधिकरणाभाव प्रतियोगितासामान्ये सत्वेनातिव्याप्त्यापत्तेः । सम्ब-न्धित्वं साध्यतावच्छेदकसम्बन्धेनाग्रे विवक्षणीयं, अन्यथा – कालिका दिसम्बन्धेन धूमादिमतिसंयोगादिसम्बन्धेन धूमत्वाद्यवच्छिन्नाभाव सत्वात् सम्बन्धसामान्येन धूमादिमन्निष्ठाभावीय संयोगादिसम्बन्धाव-च्छिन्नप्रतियोगि तानवच्छेदकं तादृश सम्बन्धावच्छिन्न प्रतियोगिता सामान्यानवच्छेदकं घटाभावत्वादिकमेव, अभावत्वादेः केवलस्यैव संयोगादिसम्बन्धावच्छिन्नाभाव प्रतियोगितावच्छेदकत्वेन तादृशगु–

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कधर्मस्यातथात्वात , भेदप्रतियोगितायां प्रसिद्धस्य तदवच्छेद्यत्वस्योभयाभाव मादायोक्तस्थल एवातिव्याप्तिः । संयोगेन धूमत्वाद्यवच्छिन्नाभाव-स्योत्पत्ति क्षणावच्छेदेन धूमत्वादिविशिष्ट सम्बन्धिनिष्ठतया तादृशाभाव प्रतियोगितानवच्छेदक घटाभावत्वाद्यवच्छेद्यत्वाभाव मादाय तत्रैवाति व्याप्ति वारणाय प्रतियोगिव्यधिकरणत्वेना प्यभावो विशेषणीयः । तत्रच प्रतियोगिपदं प्रतियोगितावच्छेदकावच्छिन्नपरमेव, अन्यथा सत्तावान् जाते रित्यादौ सत्तात्वविशिष्टसम्बन्धिनिष्ठ प्रतियोगिव्यधिकरणाभाव प्रति-योगितानवच्छेदक विशिष्टसत्तात्वाद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणा भावप्रतियोगितायां सत्त्वेना व्याप्त्यापत्तेः । वह्न्यादिमन्निष्ठस्य घटा द्यभावस्य कालिकसम्बन्धेन प्रतियोगिसमानाधिकरणतया सम्बन्ध सामान्येन प्रतियोगिव्यधिकरण तन्निष्ठाभावप्रतियोगितावच्छेदकं तदसमानकालीनघटादिव्यक्तिनिष्ठतद्व्यक्तित्वादिक मेवेति तदनवच्छेदक घटत्वाद्यवच्छेद्यत्वस्य हेतुसमानाधिकरणाभावप्रतियोगितायां सत्त्वा दव्याप्ति रतः प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यं निवेश्यम् । नतु साध्यतावच्छेदकसम्बन्धेन, कालो घटवान् कालपरिमाणा दित्यादौ कालिकसम्बन्धेन साध्यतावच्छेदकविशिष्टसम्बन्धिनि खण्डकाले तेन सम्बन्धेन प्रतियोगिव्यधिकरणस्या भावस्यसुलभत्वेपि सर्ववान् कालपरिमाणादित्यादौ महाकालस्यैव कालिकसम्बन्धेन सर्वत्वविशिष्ट सम्बन्धितया तत्र तादृशसम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या अव्याप्त्यापत्तेः । कालिकसम्बन्धेन गगनादे र्वृत्तिमत्त्वपक्षे प्रतियोगिता-धर्मिकोभयाभावघटितलक्षणकरणात् तन्मते उभयाभावघटनयापि गगना-द्यभावे कालिकसम्बन्धेन वैयधिकरण्यस्य निर्वाहयितु मशक्यत्वात् ।

नच साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व मग्रे ऽभावप्रतियोगि-तायां निवेशयिष्यति, एवंच प्रतियोगितावच्छेदकसम्बन्धेन प्रतियो-गिवैयधिकरण्यनिवेशेपि सर्वत्वावच्छिन्नसाध्यके तदवच्छिन्नसम्ब-न्धिमहाकालनिष्ठस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

करणस्याभावस्य साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगित्वा-प्रसिद्धिः, कालिकातिरिक्तसम्बन्धावच्छिन्नाभावस्यैव प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणत्वात्- तत्प्रतियोगितायांच कालिकसम्बन्धावच्छिन्नत्वविरहा दित्यव्याप्ति तादवस्थ्यमिति वाच्यम् । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणो यः स्वविशिष्ट सम्बन्धिनिष्ठो ऽभाव स्तत्प्रतियोगितासामान्ये यद्यत्सम्बन्धावच्छिन्नत्व यद्यद्धर्मावच्छिन्नत्वोभयाभावः तत्सम्बन्धावच्छिन्नत्व तद्रूपावच्छिन्नत्वोभयाभावव त्तादृशहेतुसमानाधिकरणाभाव प्रतियोगितासामान्यकं यद्यत्त्वं तद्धर्मवत्त्वं तेन सम्बन्धेन व्यापकत्वमिति विवक्षया सर्वसामञ्जस्यात् । सर्वत्वविशिष्टसम्बन्धिनि महाकाले समवायादिना प्रतियोगिव्यधिकरणस्य तत्सम्बन्धावच्छिन्न घटाद्यभावस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्व सर्वत्वावच्छिन्नत्वोभयाभावस्य सत्त्वात् साधनसमानाधिकरण तथाविधघटाद्यभावप्रतियोगितायामपि तथा विधोभयाभावसत्त्वेन कालिकसम्बन्धेन सर्वत्वावच्छिन्नस्य कालपरिमाणादिव्यापकत्वोपपत्तेः ।

नचैवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य प्रतियोगित्वा विशेषणतया ' प्रतियोगित्वं साध्यतावच्छेदकसम्बन्धेन वाच्य ' मित्यग्रिमग्रन्थविरोध इति वाच्यं, तादृशग्रन्थस्यापि उक्तोभयाभावविशेषणतायामेव तात्पर्यात् ।

वस्तुतस्तु - साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व विशेषितप्रतियोगितासामान्ये प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरण स्वविशिष्टसम्बन्धिनिष्ठाभावीयत्व यद्रूपावच्छिन्नत्वोभयाभाव स्तादृश धर्म एव अनवच्छेदकान्तार्थ इति नाग्रिमग्रन्थविरोधः । नवा महाकाल स्सर्ववान् महाकालपरिमाणा दित्यादा वप्रसिद्धिः, प्रसिद्धायां कालिकसम्बन्धावच्छिन्न घटाद्यभावप्रतियोगितायां सर्वत्वविशिष्टसम्बन्धि महाकालनिष्ठो यः समवायसम्बन्धेन प्रतियोगिव्यधिकरणः त-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तादृश प्रतियोगित्वाश्च विशिष्यो पादेयाः,

त्सम्बन्धावच्छिन्न घटाद्यभाव स्तदीयत्व सर्वत्वाद्यवच्छिन्नत्वोभया भावस्य सुलभत्वात् ।

ननु-स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं तादृशावच्छेदकत्वावच्छिन्न प्रतियोगिताकभेदः, तादृशावच्छेदकप्रतियोगिक-भेदस्य तादृशावच्छेदक यत्किञ्चिद्भिन्न तादृशावच्छेदक साधारणत्वात, तथाच लघुरूपसमनियतंयत्र गुरुरूपं तद्विशिष्टसम्बन्धिनिष्ठाभावप्रति-योगितावच्छेदकत्वस्य तादृशलघुरूपविशिष्टसम्बन्धिनिष्ठाभावप्रतियो-गितावच्छेदकत्वात्मक स्वसमनियतधर्मापेक्षया गुरुत्वेन प्रतियोगिता नवच्छेदकतया तादृशावच्छेदकत्वावच्छिन्न भेदाप्रसिद्ध्या द्वितीयाव-च्छेदकलक्षणस्य मेयधूमत्वादौ- प्रतियोगिताधर्मिको भयाभावघटित व्याप्तिलक्षणस्य प्रमेयवह्निमान् धूमादित्यादावव्याप्तिः, प्रतियोगिताधर्मिक उभयाभावघटितलक्षणे अनवच्छेदकान्तेन स्वविशिष्टसम्बन्धि निष्ठाभा-वप्रतियोगितासामान्ये यद्रूपावच्छिन्नत्व साध्यतावच्छेकसम्बन्धावच्छि न्नत्वोभयाभाव स्तद्रूपविवक्षणे स्वविशिष्टसम्बन्धि निष्ठाभावप्रति-योगितावच्छेदकावच्छिन्न भेदाप्रवेशेपि सामान्यपदार्थघटकतया स्ववि-शिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानिष्ठभेद प्रतियोगितावच्छेदकत्वाव-च्छिन्नभेदरूपस्य तादृशप्रतियोगितात्वव्यापकत्वस्य उभयाभावविशेष-णतया प्रवेशात् प्रमेयवह्नित्वावच्छिन्नसाध्यके-तद्रूपविशिष्टसम्बन्धिनिष्ठा-भाव प्रतियोगितानिष्ठभेद प्रतियोगितानवच्छेदकावच्छिन्न भेदाप्रसिद्ध्यै-वाव्याप्तिः । साध्यतावच्छेदक सम्बन्धावच्छिन्न प्रतियोगितासामान्ये स्व-विशिष्टसंबन्धिनिष्ठाभावीयत्व यद्रूपावच्छिन्नत्वोभयाभाव स्तद्रूपस्यानव-च्छेदकातार्थत्वे प्रमेयवह्नित्व विशिष्टसंबन्धिनिष्ठाभावीयत्व घटितोभयत्वा-वच्छिन्नाभावाप्रसिद्ध्यैवा व्याप्तिरित्याशंक्याह (तादृशप्रतियोगिताश्चेति) स्वविशिष्टसंबन्धिनिष्ठाभावप्रतियोगितास्त्वित्यर्थः । 'विशिष्य'-तत्तद्व्यक्ति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्वेन, नतु तादृशप्रतियोगितात्वेनेत्यर्थः । तथाचवस्तुगत्या याया स्वविशिष्टसम्बन्धिनिष्ठाभाव निरूपिताः प्रतियोगिता स्तत्तदवच्छेदकत्वावच्छिन्नभेद कूटवत्त्वमेवानवच्छेदकान्तार्थइति गुरुधर्मविशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदकत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेऽपि नक्षतिः ।

यद्यपि घटत्वावच्छिन्नाभावीया या प्रतियोगिता तदवच्छेदकत्वं घटत्वादिनिष्ठ तत्तद्व्यक्तित्वादि समनियतामिति तदपेक्षया गुरुत्वेन नप्रतियोगितावच्छेदकमिति तादृशप्रतियोगिताविशिष्योपादाया नवच्छेदकत्वादिकं दुर्वचं, तथापि यत्रप्रतियोगितायां समशरीर नानाधर्मसमनैयत्यं तत्र नानाधर्माणामेवैक प्रतियोगितायामवच्छेदकतयावच्छेदकनिष्ठ तत्तद्व्यक्तित्वानां लघुत्वेऽपि तत्प्रतियोगितावच्छेदकत्वन्यूनवृत्तितया तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्वमव्याहतमेवेति तादृशप्रतियोगितानां विशिष्यनिवेशाभिप्रायकोयंग्रन्थः । अन्यादृश प्रतियोगितावच्छेदकानाञ्च तत्तद्व्यक्तित्वेनैव भेदोनिवेश्यः ।

नचावच्छेदकभेदेन प्रतियोगिताभेदात् नानाधर्मावच्छिन्नैकप्रतियोगित्वासम्भवइति वाच्यम् , अवच्छेदकासमनैयत्यस्यैव प्रतियोगिताभेदकत्वात्; समनियत नानाधर्मावच्छिन्न प्रतियोगितैक्ये बाधकविरहात् । एवं यत्रानुगतैक रूपावच्छिन्न नानाव्यक्तीनामेकप्रतियोगितायामवच्छेदकत्वं तत्रा प्यवच्छेदकनिष्ठ तत्तद्व्यक्तित्वानां न्यूनवृत्तितया तत्रापि तत्प्रतियोगितावच्छेदकत्वस्य भेदप्रतियोगितावच्छेदकत्व मक्षतम् ।

नच तत्रापि तत्प्रतियोगिता निरूपितावच्छेदकत्व वृत्त्यनुगतरूपावच्छिन्नैकावच्छेदकताया स्तद्व्यक्तित्वेन भेदप्रतियोगितायामवच्छेदकत्वसम्भवात तत्प्रतियोगितावच्छेदकत्वत्वविशिष्टावच्छिन्न भेदोऽप्रसिद्ध्या निवेशयितु मशक्यएवेति वाच्यम् , तादृभेदनिवेशासंभवेऽपि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नातोगुरोरवच्छेदकत्वं विना दुर्वचत्वं ।

अवच्छेदकतासम्बन्धेन तत्प्रतियोगितावच्छिन्नभेद निवेशे ऽविरोधेन प्रतियोगितानां विशिष्यनिवेशनोक्तिसंगतेः । नह्याश्रयतासम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नावच्छेदकताया अवच्छेदकत्वापेक्षया ऽवच्छेदकतासम्बन्धेन तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः अवच्छेदकत्वेगौरवं, येनोक्तभेदस्याप्रसिद्धिस्स्यात् । एवं धूमत्वादेरपि धूमत्वादिविशिष्ट सम्बन्धिनिष्ठाभावप्रतियोगितायां महानसीयत्वादि सहितस्यावच्छेदकतया धर्मान्तरसहित रूपावच्छिन्नप्रतियोगितावच्छेदकानां तत्तद्व्यक्तित्वेन भेदनिवेशो नसम्भवतीति धूमत्वादे धूमत्वादिविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वानुपपत्तिः, विशेषणावच्छिन्नधूमत्वादिनिष्ठ तद्व्यक्तित्वस्यापि विशेष्यधूमत्वादि पर्याप्ततया तदवच्छिन्नभेदस्य विशेष्यभूत धूमत्वादावसम्भवादिति तत्तत्प्रतियोगितावच्छेदकस्य तादृशावच्छेदकत्वावच्छिन्नभेदएवनिवेश्यः, तथासति तादृशप्रतियोगितावच्छेदकताया व्यासज्य वृत्तितया धूमत्वादौ प्रत्येकंतदवच्छिन्न भेदसत्वेनोक्तानुपपत्त्यनवकाशात ।

नच तत्रावच्छेदकताव्यक्तेः तत्तद्व्यक्तित्वेन भेदप्रतियोगिता वच्छेदकत्वं सम्भवतीति दर्शितरूपावच्छिन्न भेदाप्रसिद्धि रिति शंकास्पदमपि, महानसीयत्व धूमत्वादिनिष्ठावच्छेदकताना मवच्छेदकसम्बन्धादिभेदेन भिन्नतया तत्तद्व्यक्तित्वेन तासा मव्यासज्य वृत्तितया धूम त्वादिनिष्ठ भेदप्रतियोगितावच्छेदकत्वासम्भवात, तत्तत्प्रतियोगितावच्छेदकतात्वेनच व्यासज्य वृत्तितया तेनैव रूपेण तादृशभेदप्रतियोगितावच्छेदकत्वात (दुर्वचत्वमिति) पारिभाषिकावच्छेद्यावच्छेदक भावस्येति शेषः । प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितायां यदि सम्बन्धविशेषावच्छिन्नत्वं ननिवेश्यते तदा प्रतियोगितावच्छेदकमात्रस्यैव वह्नित्वादिविशिष्ट

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सम्बन्धिनिष्ठ किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात् तादृशप्रतियोगितानवच्छेदकावच्छेद्यत्वाप्रसिद्ध्या ऽसम्भवः, महानसादिनिष्ठ समवायसम्बन्धावच्छिन्न वह्न्याद्यभावस्य साध्यतावच्छेदक संयोगादिसम्बन्धेन प्रतियोगिसमानाधिकरणत्वेप्ये तल्लक्षणे प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्यैव निवेशेन तादृशाभावाव्यावर्तनात् ।

नचाकाशाभावत्वादिकमेव तादृशाभावप्रतियोगिता ऽनवच्छेदकं, संयोगसमवायादि सम्बन्धावच्छिन्नाकाशाभावाभावादि प्रतियोगितायां शुद्धस्याभावत्वादेरेव लघो रवच्छेदकत्वात् , तादृशधर्मावच्छेद्यत्वंच स्वरूपसम्बन्धावच्छिन्ना काशाभावाभावात्मकाकाशादि निरूपितप्रतियोगितायां प्रसिद्धमिति वाच्यम् । आकाशाभावत्वादेरपि साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वात् । आकाशाभाव वह्निमदन्यतरत्वादेः वह्न्यादिमन्निष्ठ भेदप्रतियोगितानवच्छेदकत्वेपि विषयितादिसम्बन्धावच्छिन्न तन्निष्ठाभावप्रतियोगितावच्छेदकत्वं दुर्वारमेव, तदुभयैकतरमात्रविषयकज्ञानादौ विषयितासम्बन्धेनान्यतरत्वावच्छिन्नाभावासत्वात्, अभावत्व - वह्निमत्वावच्छिन्नाभावस्यच सत्त्वात्, अभावत्ववह्निमत्त्वादेः तादृशसम्बन्धावच्छिन्नान्यतराभाव प्रतियोगितावच्छेदकत्वासम्भवात् । विषयितादे र्वृत्त्यनियामकतया अभावप्रतियोगितावच्छेदकसम्बन्धत्वा नुपगमेतु धूमवान्वह्नेरित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितायां आकाशाभाव धूमवदन्यतरत्वादिरूप धूमादिमन्निष्ठाभाव प्रतियोगितानवच्छेदकावच्छिन्नत्वस्य उभयाभावमादाया तिव्याप्तिरित्यत एतल्लक्षणेप्रतियोगितायां साध्यतावच्छेदक सम्बन्धावच्छिन्नत्वं दर्शितप्रयोजनानुरोधेन द्वितीयावच्छेदकलक्षणेच साध्यतावच्छेदक सम्बन्धात्मक स्वविशिष्ट सम्बन्धित्वञ्च निवेशयति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रतियोगित्वं सम्बन्धित्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यम्, अतो न सम्बन्धभेदमादाय दोषः । कालिकविशेषणताविशेषेण च साध्यतायां तादृश प्रतियोगितावच्छेदकत्व मनित्यतत्तद्व्यक्तित्वे प्रसिद्धम् । अभावश्च प्रतियोगिव्यधिकरणो बोध्यः । न च मौल मिदमीयञ्च प्रतियोगिवैयधिकरण्य मनुपादेयं, संयोगत्वावच्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेः

(प्रतियोगित्वमित्यादिना) कालोघटवान् कालपरिमाणा दित्यादौ घटत्वादिविशिष्टसम्बन्धिनि महाकालप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणायोभाव स्तदीय साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगित्वाप्रसिद्धावपि यथाश्रुतस्य प्रतियोगिता धर्मिकोभयाभाव घटितलक्षणस्य नतत्रा व्याप्तिप्रसक्तिः, खण्डकालस्यापि तद्विशिष्ट सम्बन्धितया तन्निष्ठस्यातीतानागतव्यक्तीनामेव तादृशाभावस्य तथाविधप्रतियोगिताप्रसिद्धेरित्याह (कालिकेति) कल्पत्रयएवाभावे प्रतियोगिवैयधिकरण्यं निवेशयति (अभावश्चेति) (बोध्यइति) अन्यथा-अव्याप्यवृत्तिसाध्यक व्यभिचारिण्यतिव्याप्तेरितिशेषः । अव्याप्यवृत्ति संयोगादिसाध्यके व्यभिचारिण्यतिव्याप्ति मवच्छेदकलक्षण घटकाभावे प्रतियोगिवैयधिकरण्य विशेषणप्रक्षेपमन्तरेणा प्युद्धरंस्तादृशविशेषणस्य तदसत्त्वे हेतुसमानाधिकरणाभावे तादृशविशेषणस्यापि दर्शितव्यावृत्त्यसंगते स्तस्यचा नुपादेयत्व माशंकते (नचेत्यादिना) " मौलम् "- मूलस्थं हेतुसमानाधिकरणाभावे तद्विशेषणं । मौलस्यानुपदेयत्वे हेतुभूताव्याप्त्यनवकाशे हेतुमाह (संयोगत्वावच्छिन्नाभाववतीति) द्रव्यादावितिशेषः (संयोगत्वादिविशिष्टस्यवृत्तेरिति) तथाच तदनुपादानेपि संयोगिद्रव्यत्वादित्यादौ संयोगित्वादिरूप साध्यतावच्छेदके स्वरूपसम्बन्धरूपोक्त प्रतियोगितावच्छेदकत्वसत्त्वेपि निरुक्तोभयाविध पारिभाषिकावच्छेदकत्वस्यासत्त्वात्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गुणादिनिष्ठाभाव प्रतियोगितावच्छेदक द्रव्यत्वत्व द्रव्यमात्रसमवेतत्वाद्यव च्छिन्नाभावप्रतिचावृत्ते रव्याप्त्यतिव्याप्त्योरनवकाशादिति वाच्यम् ।

उक्तप्रतियोगितायां तद्विशिष्टसम्बन्धि निष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभावस्य च सत्वा न्नाव्याप्तिरिति भावः । इदमीयस्य तद्विशेषणस्या नुपादेयत्वे हेतुभूताविव्याप्त्यनवकाशे हेतु माह (गुणादीति) द्रव्येतरा ऽसमवेतत्वमात्रस्यैव द्रव्यत्वात्यन्ताभावविरोधितावच्छेदकतया तत्प्रतियोगितावच्छेदकत्वसम्भवात सकलद्रव्य समवेतत्वरूपाधिकांशघटित द्रव्यत्वत्वं नात्यन्ताभावप्रतियोगिताव च्छेदक मित्यपरितोषात (द्रव्यमात्रसमवेतत्वेति) (अवृत्तेरिति) संयोगत्वादिविशिष्टस्ये त्यनुषज्यते । तथाच तदनुपादानेपि संयोगि सत्वादित्यादौ नातिव्याप्तिः । अवच्छेदकलक्षणस्थ तत्पदेन संयोग त्वाद्युपादानासम्भवेपि द्रव्यत्वत्वादिक मादायैव संयोगत्वादौ पारिभाषिकावच्छेदकत्वस्य सूपपादत्वात्, संयोगत्वादौ संयोगत्वादिविशिष्टसम्बन्धि निष्ठाभावप्रतियोगितानवच्छेदकत्वविरहेपि तादृशप्रतियोगितानवच्छेदक द्रव्यत्वत्वावच्छिन्नत्वस्य हेतुसमानाधिकरणाभाव प्रतियोगितायां सत्त्वेन तत्र निरुक्तोभयाभावासत्वाच्चेति भावः । समवायादिना ऽव्याप्यवृत्तिसाध्यके तेन सम्बन्धेन साध्यतावच्छेदक विशिष्टव्यापकतावच्छेदकस्य व्याप्यवृत्तितावच्छेदक धर्मान्तरस्य साधननिष्ठव्यभिचारनिरूपकतावच्छेदकस्य सम्भवेनातिव्याप्त्युद्धारेपि संयोगेना व्याप्यवृत्तेः साध्यताया मतिव्याप्ति दुर्वारैव, संयोगेन किंचिद्रूपावच्छिन्नस्य व्याप्यवृत्तिताविरहात् । साधनवन्निष्ठसंयोगसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकस्य साध्यवन्निष्ठ तत्सम्बन्धावच्छिन्नाभाव प्रतियोगितावच्छेदकत्वनियमेन तत्सम्बन्धावच्छिन्न तदवच्छिन्नाभावव दसम्बन्धस्वविशिष्टसामान्यकत्वस्या संयुक्तमात्र वृत्तिगुणत्वादावेव प्रसिद्धेरिति इदमीयप्रतियोगिवैयधिकरण्यविशेषणो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

धूमवान्वह्नेरित्यादावतिव्याप्तेः । नह्युत्पत्तिकालावच्छेदेनापि महानसादौ किञ्चित् संयोगेन वर्त्तते, येन वह्निमदयोगोलकनिष्ठात्यन्ताभाव प्रतियोगितावच्छेदकायोगोलकावृत्ति द्रव्यत्वाद्यवच्छिन्नाभाव वदवृत्तित्वं धूम-

---

पादान मावश्यकम्, तदावश्यकत्वेच हेतुसमानाधिकरणाभावे तद्विशेषणस्या प्यावश्यकता, अन्यथा संयोगिद्रव्यत्वा दित्यादावेवाव्याप्तेरिति समाधत्ते (धूमवानिति)ननु धूमादिमत्यपि पर्वतादौ शिखराद्यवच्छेदेन धूमत्वाद्यवच्छिन्नाभावसत्त्वात्तेन रूपेण धूमादीनां व्याप्यवृत्तिताविरहेऽपि अयोगोलकावृत्तिद्रव्यत्वादिना तेषां तथात्व मव्याहतमेव, शिखराद्यवच्छेदेनापि तदवच्छिन्नद्रव्यान्तरसत्त्वादिति साधनाव्यापकतावच्छेदक तादृशधर्मावच्छिन्नाभाववत्त्व मयोगोलकादेरेव, धूमत्वादि विशिष्टस्य तदसम्बद्धत्वा न्नातिव्याप्तिरित्याशंकां निराकरोति (नहीति) (उत्पत्तिकालेति) तथाच धूमवति किंचिद्देशावच्छेदेना योगोलकावृत्ति द्रव्यत्वा द्यवच्छिन्नाभावासत्त्वेपि कालविशेषावच्छेदेन तदवच्छिन्नाभावस्य तत्र सत्त्वात, धूमत्वादे रवच्छेदकत्वं दुर्घटमेवेति भावः। द्वितीयकल्पे अवच्छेदकाप्रसिद्ध्या तिव्याप्तिविरहेऽपि प्रथमकल्पे प्रतियोगिताधर्मिको भयाभाव घटितलक्षणेच धूमत्वादिविशिष्टसम्बन्धिनिष्ठ संयोगसम्बन्धावच्छिन्नाभाव प्रतियोगितानवच्छेदक घटाभावत्वाद्यवच्छेद्यत्व संयोगसम्बन्धावच्छिन्नत्वो भयाभावमादाया तिव्याप्तिर्बोद्ध्या।

वस्तुतो द्वितीयावच्छेदक लक्षणेपि प्रतियोगि वैयधिकरण्याप्रवेशे संयोगेन साध्यतायां सद्धेतौ तादृशावच्छेदकाप्रसिद्ध्या व्याप्तिस्स्यादिति साध्यतावच्छेदके स्वविशिष्ट सम्बन्धिनिष्ठाभाव प्रतियोगितानवच्छेदक हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदककं यद्यत् तद्भेदस्थाने स्वविशिष्ट सम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदक तादृशप्रतियोगितावच्छेदक सामान्यकत्वं निवेश्यैव तादृशाव्याप्ति र्वारणीयेति, तथैवातिव्याप्ति रसद्धेतौ स्यादित्यत्र तात्पर्यम्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata, Digitization: eGangotri.

अथैवमपि प्रतियोगितावच्छेदकावच्छिन्न वैयधिकरण्य पर्यन्त विशेषण मकिंचित्करमेव, हेतुसमानाधिकरणाभावे यथाश्रुतप्रतियोगि वैयधिकरण्य निवेशनेपि गुणान्यत्वविशिष्ट सत्तावान् जाते रित्यादौ हेतुसमानाधिकरण प्रतियोगिव्यधिकरणाभाव प्रतियोगितावच्छेदक गुणासमेवतत्वाद्यनतिरिक्त वृत्तित्वस्य साध्यतावच्छेदके सत्त्वेना तिव्याप्ते रनवकाशात् । हेतुसमानाधिकरणाभाव विशेषण प्रतियोगि वैयधिकरण्यशरीरे प्रतियोगि तावच्छेदकावच्छिन्नत्वा निवेशने द्रव्यं गुणा दित्यादौ प्रमेयान्यत्वविशिष्टद्रव्यत्वाद्यभावस्य प्रतियोगिताश्रयानधिकरण हेत्वधिकरणकत्वाभावेन लक्षणाघटकतया विशिष्टद्रव्यत्वत्वे द्रव्यत्वत्वविशिष्टसम्बन्धिनिष्ठ स्वप्रतियोगिव्यधिकरणाभावप्रतियोगितानच्छेदकत्वे प्यति व्याप्त्यनवकाशेने दमीयप्रतियोगिवैयधिकरण्यशरीरेपि तन्निवेशन व्यावृत्त्यसम्भवात् ।

यत्तु - प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे यत्प्रतियोगिताश्रयानधिकरणत्वं हेतुमत इत्यादिक्रमेण व्याप्ति र्निर्वाच्या, तथाच प्रतियोगितायाः प्रतियोगिस्वरूपत्वे वह्न्यादिव्यक्तिभेदेन तन्निष्ठप्रतियोगितानां भेदात् वह्नित्वाद्यवच्छिन्न महानसीयवह्न्यादिनिष्ठ प्रतियोयोगिताश्रयानधिकरणत्वस्य हेतुमति पर्वतादौ सत्त्वात् वह्निमान् धूमादित्यादा वव्याप्तिरिति । तदसत्, प्रतियोगितायाः प्रतियोगि स्वरूपत्वे महानसीयवह्नित्वाद्यवच्छिन्न प्रतियोगितायाः वह्नित्वाद्यवच्छिन्न महानसीयवह्न्यादिनिष्ठ प्रतियोगित्वाभिन्नतया प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वनिवेशेपि वह्नित्वाद्यवच्छिन्न प्रतियोगितावच्छेदकमहानसीय वह्नित्वाद्यवच्छिन्नानधिकरणत्व मादाय तद्दोषतादवस्थ्यात् । द्रव्यत्वादेरपि धूमादिस्वरूप धूमत्वाद्यवच्छिन्न प्रतियोगितावच्छेदकत्वेन प्रतियोगितावच्छेदक सामान्यावच्छिन्नानधिकरणत्वनिवेशेपि अयोगोलकादावपि धूमत्वाद्यवच्छिन्नप्रतियोगि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तावच्छेदक सामान्यावच्छिन्नानधिकरणत्वस्य दुर्लभतया तथाविव क्षणासम्भवात् ।

यदिंच यादृशरूपावच्छिन्न प्रतियोगितायां अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत स्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया महानसीयवह्नित्वादि वह्नित्वाद्यवच्छेद्यतावच्छेदक वह्निवृत्तिप्रातियोगित्वत्वाव-च्छिन्नानवच्छेदकत्वान्न दोष इत्युच्यते, तदा यद्रूपावच्छिन्नप्रति-योगिताश्रयानाधिकरणत्वं हेतुमत स्तद्रूपावच्छिन्नानवच्छेदकत्वविवक्षया प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशेपि सामञ्जस्यात् ।

मैवं, प्रतियोगितावच्छेदका वच्छिन्नत्वानुपादने एतद्रूपान्यत्व-विशिष्टसत्तावान् जातेरित्यादावतिव्याप्ते दुर्वारत्वात्, तत्र हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकस्य एतद्रूपासमवेतत्वादे रेतद्रूपवि-जातीय रूपान्तरसाधारण मेतद्रूपान्यत्व विशिष्टसत्तात्वावच्छिन्नं प्रति समवायेन व्यापकतानवच्छेदकत्वात् । सम्बन्ध भेदनिबन्धन दोष-वारणाय हेतुसमानाधिकरणाभाव प्रतियोगित्व तदवच्छेदकानतिरिक्त वृत्तित्व घटकप्रतियोगितयो र्यदि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं निवेश्यते तदैव प्रतियोगिवैयधिकरण्यं द्वयानुपादाने संयोगेनसाध्य-तायां व्यभिचारिणि दर्शितरीत्यातिव्याप्तिरापद्यते । यदिच तद्दोषवा-रणाय हेतुमन्निष्ठाभावीय यत्सम्बन्धावच्छिन्न प्रतियोगितायां यदव-च्छेदकं तत्सम्बन्धावच्छिन्न तदवच्छिन्नाभावव दसम्बद्ध स्वविशि-ष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावीय तत्सम्बन्धावच्छिन्न प्रतियोगितानवच्छेदकतत्कत्वंवा निवेश्यते, उभयत्र विशिष्यविशेषणताविशे-षसम्बन्धएववा, तदा धूमवान् वह्नेरित्यादौ सम्बन्धान्तरेण विशेषणता विशेषादिना प्रतियोगिवैयधिकरण्या घटितसाध्यव्यापकताया मवच्छे-दकस्य तत्सम्बन्धघटित हेत्वव्यापकतावच्छेदकायोगोळकभेदत्वादेः प्रसिद्ध्या धूमत्वादे रवच्छेदकत्वोपपत्ते रतिव्याप्त्यनवकाश इत्या-लोच्य साध्यतावच्छेदकसम्बन्धानिवेशपक्षे प्रतियोगिवैयधिकरण्यद्वय-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्वविशिष्टस्य सम्भाव्येत । प्रतियोगितयो रेकसम्बन्धावच्छिन्नत्वस्य विशेषणता विशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपादेयमेव प्रति

स्यानुपादेयतामाह (प्रतियोगितयोरिति) यद्यपि वह्निधूमादिनिरूपित संयोगसंवन्ध घटितव्यापकता विशिष्यसमवायादिसंबन्धावच्छिन्नप्रतियोगिताद्वय घटितपारिभाषिकावच्छेदकत्व मन्तर्भाव्यापि निर्वक्तुं शक्यते, तथासत्यप्यनतिप्रसङ्गात् , तादृशहेतुसमानाधिकरणाभावीय समवायसम्बन्धावच्छिन्न प्रतियोगितावच्छेदकस्य यद्विशिष्ट संयोगिनिष्ठ तत्संवन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वं तदन्यत्वस्य तद्धेत्वव्यापकतावच्छेदकसाधारण्याभावात्, यत्राधिकरणे तदवच्छिन्नस्य व्यभिचार स्तदसमवेतत्वस्य हेतुमन्निष्ठ समवाय सम्वन्धावच्छिन्न प्रतियोगितावच्छेदकस्य संयोगेन तद्धर्मविशिष्टं प्रति समवायेन व्यापकताया मवच्छेदकतया तादृशधर्माणां पारिभाषिकावच्छेदकताध्रौव्यात् । तथापि विशेषणताविशेषादिघटितव्यापकतायां समवायादिसम्बन्धावच्छिन्न? प्रतियोगिताद्वयघटितावच्छेदकत्वनिवेशे महानसभेदत्वादिविशिष्टस्य विशेषणताविशेषादिना यः सम्बन्धी सामान्यादि स्तन्निष्ठाभावीय समवायादिसम्बन्धावच्छिन्न प्रतियोगितानवच्छेदकत्वस्य वह्न्यादिसमानाधिकरणाभावीय तत्सम्बन्धावच्छिन्न प्रतियोगितावच्छेदके ऽ सम्भावितत्वा न्महानसभेदत्वादे रपि वह्न्यादि व्यापकतावच्छेदकताप्रसंगात् , तत्र विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताद्वय घटितावच्छेदकत्वाभावरूप व्यापकतावच्छेदकत्व मेवानुमित्यौपयिकं वाच्यम् , तथाच सर्वत्र तादृशावच्छेदकत्वाभावज्ञानस्यैवा नुमितिहेतुत्व मुचितं, एकजातीयावच्छेदकत्वाभावसत्त्वानुरोधा दित्याशयेनाह (विशेषणताविशेषेणेति) (अनुपादेयमिति) तथाच साध्यतावच्छेदकसम्बन्धनिवेशाभिप्रायेण मूलकृता प्रतियोगिवैयधिकरण्य मुपात्तमिति भावः । अतिव्याप्तिवारण

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

योगि वैयधिकरण्यद्वयम् । यत्राधिकरणे व्यभिचार स्तदन्यत्व

प्रकारं दर्शयति (यत्राधिकरण इति) साध्यतावच्छेदकस्यापि कालिकसम्बन्धेन साध्यवद्वृत्ते रभावस्य प्रतियोगितावच्छेदकतया येन सम्बन्धेन हेतुमद्वृत्तित्व मभावस्य तेन सम्बन्धेन स्वविशिष्ट सम्बन्धिनिष्ठत्वं वाच्यं, उभयत्र विशेषणताविशेष एववा अभावस्य सम्बन्धः । एतत्कल्पेच घटभिन्नं मेयत्वादित्यादौ घटादिभेदाभावस्य घटत्वादिरूपस्य तद्व्यक्तिभेदाभावस्य तदीयासाधारणधर्मरूपाद्यात्मक तद्व्यक्तित्वस्यच विशेषणताविशेषेणावृत्ते र्घटभेदत्वादे र्लक्षणघटकत्वा सम्भवः , एतद्घट तद्घटान्यतरत्वावच्छिन्न भेदाभावस्य तादृशा न्यतरत्वस्य भेदविशेषात्मकतया तादृशसम्बन्धेन वृत्तावपि तादृश भेदत्वानुसरणे प्रयासगौरवम् , गगनभिन्नं मेयत्वादित्यादौ व्यभि- चारनिरूपकाधिकरण गगनभेदाभावस्य शब्दात्मकस्य गगननिष्ठा न्यविशेषरूपस्यवा समवायेनैव गगनवृत्ते स्तद्भेदत्वस्य लक्षणघटक त्वासम्भवात् व्यभिचारनिरूपकाधिकरणान्यत्व मादायातिव्याप्तिनिरा- करणायोगश्चेति तदन्यत्वप्रकारक प्रमाविषयत्वत्वानुधावनम् ।

यत्तु - अयं घटो घटतद्भेदान्यतरत्वादित्यादौ व्यभिचारनिरूप काधिकरणघटादिभेदस्य यो भेद स्तस्य भेदधारानवस्थाभयेनाधिक- रणस्वरूपस्य साध्यवति घटादौ नविशेषणतया वृत्तिः, द्रव्यादिरूपा भावस्य विशेषणतानभ्युपगमादिति तदन्यत्वं नतत्सम्बन्धेन व्यापक ताया मवच्छेदकमिति प्रमाविषयत्वत्वानुधावनमिति । तदसत् , घटादि रूपभेदस्य घटादौ वृत्तिनियामकसम्बन्धान्तराभावेन भेद त्वरूपेण वृत्तिनियामकस्वरूपसम्बन्धस्या ऽवश्योपेयत्वात् ।

अयोगोळकान्यत्वप्रकारक प्रमाविषयत्वत्वापेक्षया धूमादिप्रकारकप्र- माविषयत्वत्वे धूमादिव्यापकतावच्छेदकत्व माशुग्राह्य मित्याशयेन तदेवानु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रकारकप्रमाविषयत्वत्व साध्यवत्त्वप्रकारक प्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्ट साध्यवन्निष्ठात्यन्ताभाव प्रतियोगितानवच्छेदकत्वा द्धेतुतावच्छेदकविशिष्ट हेतुमन्निष्ठाभाव प्रतियोगितावच्छेदकत्वा च्चातिव्याप्ते रनवकाशात् । तथाच विशेषणताविशेषावच्छिन्न यद्धर्मविशिष्ट सम्बन्धिनिष्ठाभाव प्रतियोगितानवच्छेदकावच्छेद्यत्वं

सरति(साध्यवत्त्वप्रकारकेति)साध्यतावच्छेदकसम्बन्धेन साध्यतावच्छेदकावच्छिन्नप्रकारकेत्यर्थः (प्रतियोगितेति) अभावीयविशेणतासम्बन्धावच्छिन्नप्रतियोगितेत्यर्थः । (अतिव्याप्तेरिति) अवच्छेदकताघटकाभावे प्रतियोगिवैयधिकरण्या निवेशेपि धूमवान् वह्ने रित्यादावित्यादिः । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकस्य स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वोक्ते रर्थतः स्वविशिष्टसामान्ये तदवच्छिन्नाभावव दसम्बन्धित्वं लभ्यत इति कल्पद्वय एवातिव्याप्तिनिरासो लभ्यते । अत्रानवच्छेदकत्वघटितव्याप्तिलक्षणे यथाश्रुत प्रथमनिरुक्तावच्छेदकताया निवेशे जातिमा न्मेयत्वादित्यादौ सामान्यादिसमवेतत्वाप्रसिद्ध्या जातित्वादे रवच्छेदकताया दुरुपपादत्वेना तिव्याप्तिः, अवच्छेदकलक्षणे स्वविशिष्ट प्रतियोगिक साध्यतावच्छेदक सम्बन्धे तदवच्छिन्नाभावव दननुयोगिकत्व निवेशने कालो घटवान् कालपरिमाणा दित्यादौ अवच्छेदकाप्रसिद्धिः, गगनत्वादिविशिष्टप्रतियोगिककालिकसम्बन्धाप्रसिद्धेः; एवं चरमनिरुक्तावच्छेदकतानिवेशपक्षेपि तत्रावच्छेदकाप्रसिद्धिः, साध्यतावच्छेदक सम्बन्धेन गगनत्वादिविशिष्टसम्बन्धिनोऽ प्रसिद्धेः, दर्शितरीत्यनुसरणेच गौरवमिति कालिकसम्बन्धेन गगनादे रवृत्तित्वपक्षेपि प्रतियोगिताधर्मिक पारिभाषिकावच्छेद्यत्वाभाव घटितव्याप्तिरेवावलम्बनीयेत्याशयेन तत्पक्षमालम्ब्यैव निष्कृष्टार्थमाह (तथाचेति) प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व निवेशपक्षे तस्यावच्छेद्यत्वाभावानुयोगि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विशेषणतानसम्भवति, स्वावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरण हेतुमन्निष्ठाभावीय साध्यतावच्छेदकसम्बन्धावच्छिन्न प्रतियोगिताया-दर्शितस्थले ऽप्रसिद्धेरिति तत्पक्षे प्रतियोगिदिशि साध्यतावच्छेदकस-म्बन्धावच्छिन्नत्वं निवेश्योभयाभावो निवेशितः । विशेषणताविशेषरूप सम्बन्धनिवेशेच हेतुसमानाधिकरण कालभेदाद्यभावस्यैव तत्सम्बन्धावच्छिन्नप्रतियोगित्वप्रसिद्ध्या तत्सम्बन्धावच्छिन्नप्रतियोगिताधर्मिक तादृशावच्छेद्यत्वमात्राभाव निवेशोपि सम्भवतीत्युभयाभावोपेक्षा ।

यद्यपि — हेतुसमानाधिकरणाभाव प्रतियोगितासामान्ये साध्यताव च्छेदकावच्छिन्न समानाधिकरणाभाव प्रतियोगितावच्छेदकावच्छेद्यत्व निवेशेनैवोपपत्तावभावद्वय निवेशनमनतिप्रयोजनं, तथापि तदनिवेश-प्रतियोगितायां पारिभाषिकसाध्यतावच्छेदकावच्छेद्यत्वाभावस्य लक्षणा घटकतया लक्षणान्तरमेवेदंस्यात्, नतु मूलोक्तलक्षणार्थइति तदुपादानम् । यथासन्निवेशेचावैयर्थ्यम् । अन्यथा साधनसमानाधिकरणाभावप्रतियो-गिता सामान्ये साधनसमानाधिकरणसामान्येवां यद्धर्मविशिष्ट सम्ब-न्धिनिष्ठाभावीयत्वं यद्धर्मसम्बन्धिनिष्ठत्वंवा तद्धर्मविशिष्टसामानाधिक-रण्यस्यैव व्याप्तित्वसम्भवेन भागान्तरस्या प्यनुपादानापत्तेः । वक्ष्यते च मूलमननुरुध्य स्वसमानाधिकरणाः सर्वे यद्धर्मावच्छिन्नसमानाधिक-रणाः तद्धर्मावलीढसामानाधिकरण्यं व्याप्तिरिति व्याप्तिग्रहोपायशेषे दीधितिकृतैव ।

केचित्तु-सामान्यपदस्य व्यापकतार्थकतया हेतुसमानाधिकरणाभाव प्रतियोगितानिष्ठाभाव प्रतियोगितानवच्छेदकं यद्विशिष्टसम्बन्धिनिष्ठा भावप्रतियोगितानवच्छेदकावच्छेद्यत्वाभावत्वं तादृशप्रतियोगितानिष्ठ भेदप्रतियोगिता नवच्छेदकोवा यद्विशिष्टसम्बन्धिनिष्ठाभाव प्रतियो-गितानवच्छेदका वच्छेद्यत्वाभाव इत्येव फलितार्थः । तत्रचाभावद्व यानुपादाने तादृशप्रतियोगितानिष्ठाभाव प्रतियोगितानवच्छेदकं यद्वि शिष्ट सम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदका वच्छेद्यतात्व मित्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

र्थपर्यवसाने मेयधूमवान् वह्नेरित्यादावतिव्याप्तिः, मेयधूमत्व विशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदकावच्छेद्य तात्वस्य गुरुतया ऽयोगोळक भेदाभावप्रतियोगितानिष्ठ तादृशावच्छेदका वच्छेद्यत्वाभाव प्रतियोगिताया मप्यनवच्छेदकत्वात् । विशिष्य तत्प्रतियोगितावच्छेदकावच्छेद्यत्वत्वरूपेणच व्यापकत्व मशक्यनिवेशनं, वह्न्यादि समानाधिकरण ह्रदत्वाद्यभावीया या प्रतियोगिता तत्तदवच्छेदकावच्छेद्यत्वत्वरूपेण धूमादिसमानाधिकरणाभावान्तर प्रतियोगितासाधारणनिरुक्त प्रतियोगितात्व व्यापकत्वाभावा दसम्भवापत्तेः । अभाव द्वयोपादानेच तत्तत्प्रतियोगितावच्छेदकभेदकूटवन्तो ये ह्रदभेदत्वादयो धर्माः तदवच्छेद्यत्वाभावानां प्रत्येकं तथाविधसकलाभावप्रतियोगिता साधारणतया तादृशावच्छेद्यत्वाभावकूटस्य प्रातिस्विकरूपेणा व्यापकतानिवेशात् अतिव्याप्त्यनवकाश इत्याहुः ।

अन्येतु – अभावद्वयानुपादाने प्रतियोगितायाः प्रतियोगिस्वरूपत्व मते धूमवान् वह्ने रित्यादा वतिव्याप्तिः, वह्निसमानाधिकरणायोगोळकभेदाद्यभावप्रतियोगिताया मयोगोळकभेदादिरूपायां धूमत्वादिविशिष्टसम्बन्धिनिष्ठाभाव प्रतियोगितावच्छेदक महानसवृत्तित्वविशिष्टायोगोळकभेदत्वाद्यवच्छेद्यत्वसत्त्वात् । विशिष्ट भेदत्वाद्यवच्छिन्नविशिष्ट भेदरूप प्रतियोगितातः शुद्धायोगोळकभेदादिरूपप्रतियोगिताया अनतिरेकात् । अभावद्वयोपादानेचा ऽयोगोळकभेदत्वाद्यवच्छिन्न प्रतियोगितायां धूमत्वादिविशिष्टवन्निष्ठो यो भाव स्तन्निरूपितप्रातियोगितात्वावच्छिन्नानवच्छेदक शुद्धायोगोळकभेदत्वाद्यवच्छिन्नत्व सत्वान्नातिव्याप्तिः ।

नचैवं वह्निमान् धूमादित्यादौ धूमादिसमानाधिकरण पर्वतादिवृत्तित्वविशिष्ट ह्रदभेदाद्यभावीयविशिष्ट ह्रदभेदात्मकप्रतियोगितायां वह्न्यादिसमानाधिकरणाभाव प्रतियोगितानवच्छेदक शुद्धह्रदभेदत्वाद्यवच्छिन्नत्व मप्यक्षतं, शुद्धह्रदभेदादिरूप तदभावप्रतियोगितातो विशिष्टह्रदभेदादिरूप प्रतियोगिताया अनतिरेका दित्यव्याप्ति रसम्भवो वेति वाच्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ह्रदभेदाद्यात्मक प्रतियोगितायां शुद्धह्रदभेदत्वावच्छिन्नत्व सत्त्वेपि विशेषण वैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभावोपगमादिति ।

तदसत्, विशेषण वैशिष्ट्यावच्छेदेनावच्छेद्यत्वाभावोपगमे धूमवान् वह्नेरित्यादावतिव्याप्तिवारणस्याप्य शक्यत्वात् । अयोगोळक भेदादिरूपायां शुद्धायोगोळक भेदत्वाद्यवच्छिन्नाथामपि प्रतियोगितायां किंचिद्विशेषण वैशिष्ट्यावच्छेदेन तदवच्छिन्नत्वाभाव सम्भवात् ।

नच यादृशयादृशरूपेण प्रतियोगितानां हेतुसमानाधिकरणाभावीयत्वं तादृशतादृशरूपावच्छेदेन तथाविधावच्छेद्यत्वाभाव विवक्षणान्नदोषइतिवाच्यम्, एवं सत्यभावद्वयानुपादानेपि सामञ्जस्यात्, शुद्धेविशिष्टायोगोळक भेदत्वाद्यवच्छेद्यत्वासत्त्वात्; विशिष्टे तत्सत्त्वेनैव शुद्धेतत्सत्त्वे विशिष्टेऽयोगोळक भेदत्वाद्यवच्छेद्यत्वाभावसत्त्वात् शुद्धेप्ययोगोळक भेदादिरूपप्रतियोगित्वे तादृशाभावसत्तायादुर्वारत्वाद्भावद्वयोपादानेप्यतिव्याप्तितादवस्थ्यात् । प्रतियोगिता धर्मिकावच्छेद्यत्वाभाव घटितव्याप्तिपक्षे प्रमेयवह्निमान् धूमादित्यादौ साध्यतावच्छेदक निरूपितस्वरूपसम्बन्धरूपावच्छेद्यत्वाप्रसिद्ध्या तत्रतदभाव घटितलक्षणासम्भवात् - निरुक्तपारिभाषिकावच्छेद्यत्वाभाव घटितलक्षणस्यादरणीयत्वेपि वह्निमान् धूमादित्यादौ लाघवा त्स्वरूपसम्बन्ध रूपावच्छेद्यत्वाभाव घटितव्याप्तिरेवोचिता, साध्यतावच्छेदकभेदेन व्याप्तिभेदात् ।

नचैव मनवच्छेदकत्व घटितव्याप्तिपक्षेपि धूमवति क्वचिद्द्रव्यत्वभावसत्त्वेपि प्रमेयवह्नित्वं गौरवा द्धूमसमानाधिकरणाभाव प्रतियोगितानवच्छेदकमिति भ्रमदशायामनुमिति वारणाय गुरुधर्मावच्छिन्नसाध्यकव्याप्ति शरीरे पारिभाषिकावच्छेदकत्वाभावस्यैव निवेशेपि वह्नित्वावच्छिन्न साध्यकव्याप्तिशरीरे स्वरूपसम्बन्धरूपावच्छेदकत्वाभाव एवलाघवा न्निवेशयितु मुचितइतिवाच्यम्, धूमादिसमानाधिकरणाभाव

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत्सम्बन्धावच्छिन्न साधनसमानाधिकरणात्यन्ताभाव प्रतियोगिता सामा
न्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यव-
सितोऽर्थः । यत्र सद्धेतौ साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं
तत्रैवेयं रीतिरुपादेयेत्यपि वदन्ति ।

प्रतियोगित्वीय स्वरूपसम्बन्ध रूपावच्छेदकत्वाभावस्य धूमादिव्याप-
कतानवच्छेदक कम्बुग्रीवादिमत्त्वादि साधारणतया व्यापकतावच्छेद
कतानात्मकत्वेन वह्नित्वादिधर्मिकानवच्छेदकत्वज्ञानस्या प्यहेतुत्वादिति
केषाञ्चिन्मतमाह (यत्रेति) यद्रूपावच्छिन्न साध्यकइत्यर्थः ।
प्रमेयवह्नित्वादौ गौरवप्रयुक्ता नवच्छेदकत्वग्रहदशायां भ्रान्तानां द्रव्य-
त्वादिव्यभिचारि लिंगेन तद्रूपावच्छिन्न साध्यकानुमिते रनुरोधेनास-
ल्लिंगकलघुरूपसमनियत गुरुधर्मावच्छिन्न साध्यकानुमितावप्यवच्छेद्य
त्वाभावघटित व्याप्तिपक्षे पारिभाषिकावच्छेद्यत्वाभावज्ञानमेव यद्यपि
हेतुः, तथापि वास्तविकीव्याप्तिः सद्धेतावेवेत्यभिप्रायेण " सद्धेता "
वित्युक्तम् ।

" वदन्ती " त्यस्वरसस्सूचितः । तद्बीजश्च - यदि गुरुधर्माव-
च्छिन्नसाध्यकस्थले पारिभाषिकावच्छेद्यत्वाभावज्ञाना दनुमिति स्तदा
वह्नित्वाद्यवच्छिन्न साध्यकस्थले तज्ज्ञानान्नानुमिति रित्युक्ते रनुभव
विरोधेनासम्भवः, एकजातीयपरामर्श सत्त्वे विषयस्वभावा त्क्वचि
देवानुमितिः क्वचिन्नेत्यननुभवात , अन्यथा यत्र व्यतिरेकिणि केवला-
न्वयित्वभ्रमदशायां नानुमितिस्तादृशव्यतिरेकि साध्यके साध्यवदन्या-
वृत्तित्वमेव व्याप्तिः -नतु व्यापकसामानाधिकरण्यं - गौरवात् - इत्यु-
क्तिसम्भवेनमूलकृतो व्यापकसामानाधिकरण्यमालम्ब्य सिद्धान्तप्रणयन
विरोधापातात् । एवं समवायेन भेदप्रतियोगितावच्छेदक जातित्वाद्यव-
च्छिन्न साध्यकानुमितौ स्वरूपसम्बन्धरूपावच्छेद्यत्वाभावज्ञानस्यहेतुत्वे
हेतुसमानाधिकरणात्यन्ताभाव प्रतियोगितायां नित्यत्वादेवैयर्थ्येन समवे-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्

सत्वादिक मेवावच्छेदकं, नतु तद्घटित जातित्वादिकमिति ज्ञानदशायां हेतौ तदवच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभाव सामानाधिकरण्यग्रहेऽपि [व्यभिचारिहेतुनाऽभ्रान्तानां] जातित्वाद्यवच्छिन्न साध्यकानुमित्यापत्तिः, भेदप्रतियोगितायां जातित्वाद्यवच्छेद्यत्वप्रसिद्ध्या तदभावज्ञानस्यप्रमात्वात् । एवमभावप्रतियोगितावच्छेदक महानसीय वह्नित्वादेर्वह्नित्वादिसमनैयत्य भ्रमेण गौरवप्रयुक्तानवच्छेदकत्वभ्रमदशायां हेतौ तद० वच्छिन्नव्यापकतावच्छेदकावच्छिन्नाभावसामानाधिकरण्यग्रहेऽपि महानसीय वह्नित्वाद्यवच्छिन्नसाध्यकानुमितिप्रसंगइति तद्रूपावच्छिन्नसाध्यकानुमितावपि स्वरूपसम्बन्धरूपावच्छेद्यत्वाभाव ज्ञानस्य हेतुत्वासम्भवः । वस्तुतो भेदप्रतियोगितायां प्रसिद्धस्यस्वरूपसम्बन्धरूपमहानसावृत्ति द्रव्यत्वाद्यवच्छिन्नत्वस्य संयोगसम्बन्धावच्छिन्नत्वस्यच द्वयोर्व्यतिरेको धूमादिसमानाधिकरणाभाव प्रतियोगितासामान्ये वर्तते, संयोगादिसम्बन्धावच्छिन्न प्रतियोगितायाः शुद्धमहानसावृत्तित्वादिनैवावच्छेदादिति - स्वावच्छेद्यत्व घटितोभयाभावव द्धूमादिसमानाधिकरणाभावप्रतियोगितासामान्यकत्वं धूमादिव्यापकतानवच्छेदक महानसावृत्तिद्रव्यत्वादि साधारणतया नव्यापकतावच्छेदकता स्वरूपमिति वह्नित्वादावपि तज्ज्ञानं नानुमितिजनकं,अवच्छेदकत्वाभावघटितव्याप्ति पक्षेपिवह्नित्वाद्यवच्छिन्नसाध्यकस्थले स्वरूपसम्बन्धरूपावच्छेदकत्वाभाव ग्रहस्य हेतुतायाः एतादृश युक्तेरेवा नवकाशात् । इत्यादिकं बोध्यम् ।

केचित्तु - पारिभाषिकावच्छेद्यावच्छेदकभाव घटितव्याप्ता वुक्तरीत्या प्रतियोगिवैयधिकरण्यानिवेशेन लाघवात् सर्वत्रैव तद्घटित व्याप्त्यादर उचित इत्यस्वरसवीजमाचक्षते ।

गुरुधर्मस्यापि स्वरूपसम्बन्धरूप मवच्छेदकत्वं व्यवस्थाप्य तद्घटितव्याप्तिं परिष्कुर्वताम्मतमाह (गौरवप्रतिसन्धानदशायामिति)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नास्तीतिप्रतीतिबलात् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः ।

घटत्वाद्यपेक्षया कम्बुग्रीवादिमत्त्वादौ गुरुत्वज्ञानदशाया मित्यर्थः (इति प्रतीतिबलादिति) इत्याकारिकायाः कम्बुग्रीवादिमत्वाद्यात्मकप्रतियोगिविशेषणांशे प्रतियोगितावच्छेदकत्वावगाहिन्याः प्रतीतेर्बलादित्यर्थः । भवतिचेतिशेषः । गौरवस्यावच्छेदकता व्यावर्तकत्वे गौरवज्ञानस्यावच्छेदकताग्रहविरोधित्वप्रसङ्गेन तद्दशायां तादृशप्रतीत्यनुपपत्तेरितिभावः । उक्तप्रतीतेरवच्छेदकत्वांशे प्रमात्वस्य सविवादतया तादृशप्रतीतें रवच्छेदकता साधकत्वमुपेक्ष्य गौरवज्ञानकालीन तादृशप्रतीत्यनुपपत्तिः साधकतयोपन्यस्तेतिध्येयम् ।

नच कम्बुग्रीवादिमान्नास्तीति प्रतीतावच्छेदकत्वं नप्रकारः, अपितु संसर्गएवेति तदंशे सम्बन्धविशेषावगाहित्व तत्प्रकारकत्व घटितभ्रमत्वमप्रसक्तमितिवाच्यम् । अनत्ववत्प्रमात्वस्यापि प्रकारतादिघटितत्वेन प्रमात्वविवादानपायात् ।

वस्तुतस्तु कम्बुग्रीवादिमत्त्वावच्छिन्न प्रतियोगिताकत्वमभावे प्रतियोगिसम्बन्धः, कम्बुग्रीवादिमत्त्वावच्छिन्नत्वा प्रसिद्धिपक्षेऽपि विशेष्यविशेषणभावापन्नानां प्रतियोगित्वावच्छिन्नत्व कम्बुग्रीवादिमत्त्वानां सम्बन्धघटकता, एवंच तेषां परस्परं सम्बन्धभानमप्यावश्यकं, तेनविना विशेष्यविशेषणभावा निर्वाहात् । संसर्गःसंसर्गोनविशिष्टधीविषयइति प्रवादस्यच संसर्गघटकवस्त्वन्तराविशेषणत्वेन यस्यसंसर्गता तत्संसर्गोनभासतइत्यर्थः । तथाचोक्तप्रतीते रवच्छिन्नत्वे कम्बुग्रीवादिमत्त्वभ्रमत्वं गुरुधर्मस्या नवच्छेदकत्ववादिनां निष्प्रत्यूहमेव, संसर्गताविशेषसाधारण संसर्गविशेषावच्छिन्न विषयतात्वरूपेणैव प्रकारताया भ्रमत्वघटकतोपगमात् । प्रकारतात्वं पुनरखण्डधर्मान्तरं संसर्गतान्यात्वरूपमेव, अतो नसंसर्गविशेषभाने तज्ज्ञानापेक्षा, तादृशधर्मपुरस्कारेणैव विषयताविशेषस्य विशेषणज्ञानजन्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नचास्या स्तत्प्रतियोगिकाभावमात्रमवलम्बनं, तथाविधयत्किञ्चिद्व्य क्तिसत्त्व एव तादृशप्रतीतेरनुदयात् । अतएवैकघटवति भूतले कम्बुग्री वादिमान् नास्तीतिशब्दो न प्रमाणं, प्रमाणञ्च घटसामान्य

त्वावच्छेदकत्वात । इत्थञ्च नोक्तप्रतीतिः प्रतियोगितायां गुरुधर्मावच्छि न्नत्व साधकेतत्यवधेयम् ।

. गौरवप्रतिसन्धान कालीनायां कम्बुग्रीवादिमान्नास्तीत्याकारि-कायामपि प्रतीतौ कम्बुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं नभा सते, अपितु तत्सामानाधिकरण्यमात्र मित्याशंकते (नचेति) (तत्प्रतियोगिकेति) कम्बुग्रीवादिमत्त्वाद्याश्रय प्रतियोगिकेत्यर्थः । "अवलम्बनं"-विषयः(तथाविधेति) कम्बुग्रीवादिमत्त्वाश्रयेत्यर्थः (तादृश· प्रतीतेरनुदयादिति) तथाच तस्यास्तत्प्रतियोगिकाभाव मात्रावलम्बनत्वे यत्किञ्चिद्घटादिमत्यपि तथाविधघटाद्यभावस्या बाधेन तादृशप्रती तिः स्यादेवेति भावः (अतएवेति) यतएव कम्बुग्रीवादिमा न्नास्ती त्यादि प्रतीतौ कम्बुग्रीवादिमत्त्वादेः प्रतियोगितावच्छेदकत्वं नियम तो भासते, गुरुरपिच धर्मः प्रतियोगितावच्छेदकः, अतएवे त्यर्थः । (एकघटवतीति) प्रतिपादकत्वं शब्दान्वयितया सप्तम्यर्थः । 'भूतल' इति ज्ञानाकारान्तर्गतम् । ' एकघटवति' 'भूतल'इत्यनयो र्मिथोन्वये तदु-त्तरमत्रेति ज्ञानाकारान्तर्गतं पूरणीयम् (न प्रमाणमिति) तादृशप्रती ते रवच्छेदकत्वावगाहित्वा नियमे एतादृशशब्दजन्य तादृशप्रतीतेः प्रमात्वस्यापि सम्भवेन प्रमाणमपि स्यादित्युपष्टम्भ संगतिः (प्रमाणं-चेति) गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे बाधितावच्छेदकत्व ग्रा-हकतया तादृशशब्दोपि प्रमाणं न स्यादित्युपष्टम्भः ।

एतेन गुरुधर्मस्यावच्छेदकतायां युक्त्यन्तरमपि दर्शितम् । नच कम्बुग्रीवादिमा न्नास्तीति प्रतीतौ कम्बुग्रीवादिमत्त्वविशिष्ट सम्बन्ध

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शून्ये । नचेदेवं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः, गुणादिगुणकर्मान्यत्व विशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगिताया लाघवेन द्रव्यादिनिष्ठाभाव प्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात् । तत्तदवच्छेदकाव व्यक्तीनाञ्च प्रातिस्विकरूपेणाभावानां युगसहस्रेणापि ज्ञातुमशक्यत्वात् ।

निष्ठाभाव प्रतियोगितानवच्छेदक रूपावच्छिन्न प्रतियोगिताकत्वमेक संसर्गतया भासत इत्युपेयम्, तथाच गुरो रनवच्छेदकत्वेपि नोक्त दोषावसर इति वाच्यम्। तत्त त्प्रतियोगितावच्छेदक भेदाना मनन्तानां सम्बन्धघटकत्वे मानाभावात्, गौरवाच्च। गुरुधर्मस्यानवच्छेदकत्वे द्रव्यं गुणात् गुणकर्मान्यत्वविशिष्ट सत्त्वादित्यादौ हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वत्वस्य द्रव्यनिष्ठाभाव प्रतियोगितावच्छेदकत्वत्वरूप समनियत धर्मापेक्षया गुरोः प्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नाभावाप्रसिद्ध्या ऽव्याप्तिरपीत्याह (नचेदिति). " एवं "- गुरो रवच्छेदकत्वं (लघुरूपेति) विशेषणानवच्छिन्न द्रव्यत्वा दीत्यर्थः। अधिकगौरवप्रदर्शनाय विशिष्टसत्तारूप हेत्वनुसरणं। (लाघवेनेति) गुणत्वावच्छिन्नप्रकारेण हेतुमन्निवेशापेक्षया निर्विशेषण द्रव्यत्वादिपुरस्कारेण तन्निवेशे लाघवादित्यर्थः।

ननु हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकतानां तादृशावच्छेदकत्वत्वेन नाभावो व्याप्तौ निवेशनीयः, किन्तु तत्तद्व्यक्तित्वेन सर्वेषा मभावकूटएवेति तादृशावच्छेदकतात्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि न क्षतिरित्यत आह (तत्तदवच्छेदकत्वेति) (प्रातिस्विकेति) तत्तद्व्यक्तित्वेनेत्यर्थः (ज्ञातु मशक्यत्वादिति) अनन्तानां तादृशावच्छेदकत्वरूप प्रतियोगिनां प्रतियोगितावच्छेदक तत्तद्व्यक्तित्वेन ज्ञानासम्भवादिति भावः। निर्विशेषणक स्वघटितधर्मापेक्षया विशिष्टस्व घटितस्य गौरवेणानवच्छेदकत्वनिबन्धना मव्याप्ति-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एवं द्रव्यत्वत्वादि विशिष्टद्रव्यत्वादेरव्याप्यत्वप्रसंगो ऽनुसन्धेयः । उपदर्शितप्रकारस्यापि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् । अतएव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि सङ्गच्छत इत्यपि केचित् । इति कृतं पल्लवितेन ।

इति श्री रघुनाथ शिरोमणि विरचिता

अवच्छेदकता निरुक्तिः ।

आह (एवमिति) रीत्येति शेषः (अव्याप्यत्वप्रसंगो ऽनुसन्धेय इति) अतो गुरोरवच्छेदकत्व मावश्यकमेवेति शेषः । अत्रैव हेत्वन्तरमप्याह (उपदर्शितप्रकारस्यापीति) अपि दुर्ज्ञेयत्वादित्यनन्तरं योज्यः । 'उपदर्शितप्रकारस्य' – मेयधूमवान् वह्नेरित्यादा वतिव्याप्तिवारणाया नुसृतस्य पारिभाषिक हेतुसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वस्य । "स्वत्वा दी"त्यादिना प्रातिस्विकरूपावच्छिन्न तत्तत्प्रतियोगितापरिग्रहः (दुर्ज्ञेयत्वादिति) तथाच गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे गुरुधर्मावच्छिन्न साध्यकव्यभिचारि व्यावृत्त शक्यज्ञानकव्याप्तिनिर्वचन मप्यशक्यंस्या दिति भावः। उक्तस्थले हेतुसमानाधिकरणाभाव प्रतियोगिता वच्छेदकतात्वस्य गुरुतया स्वरूपसम्बन्धरूप प्रतियोगितावच्छेदकत्वासम्भवेपि उक्तरीत्या पारिभाषिक तदीयप्रतियोगितावच्छेदकत्वस्यैव व्याप्तौ निवेशनीयतया न तदवच्छिन्नाभावाप्रसिद्धि निबन्धनाव्याप्तिरित्याशंकया " उपदर्शिते " त्यादि ग्रन्थावतरणन्तु न सम्भवति, तादृशावच्छेदकत्वत्वनिष्ठ तथाविधावच्छेदकतायां स्वपदेन तन्मात्रस्योपादानात् , तादृशावच्छेदकत्वत्वविशिष्ट व्यापकतावच्छेदका वच्छिन्नाभाव निवेशस्य पर्यवसितत्वात् (व्यभिचारित्वमपि संगच्छत इति) व्यभिचारस्य साध्यतावच्छेदका वच्छिन्नाभावव–

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वृत्तित्वरूपत्वात, गुरुधर्मस्यानवच्छेदकत्वे घ्राणग्राह्यगुणत्वाद्यवच्छिन्नप्रतियोगित्वाप्रसिद्धया तदनुपपत्तेरितिभावः ।

नच साध्यतावच्छेदक विशिष्टव्यापकतावच्छेदकावच्छिन्नाभाव सामानाधिकरण्यमेव व्यभिचारइत्युक्तस्थले गन्धत्वाद्यवच्छिन्नाभावमादाय व्यभिचार उपपादनीय इतिवाच्यं, व्यापकतावच्छेदकता शरीरे साध्यतावच्छेदक विशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानां विशेष्योपादेयतया तत्तत्प्रतियोगितावच्छेदकभेद कूटस्यान्तर्भावनीयत्वेन व्यभिचारज्ञानस्याशक्यतया ऽनुमितिविरोधित्वासम्भवेन व्यभिचारस्यहेत्वाभासतानुपपत्तेः ।

एतेन - व्यभिचारज्ञानाभाव सहकृतसामानाधिकरण्यज्ञानस्य साक्षादनुमिति हेतुतामतावलम्बना सम्भवोपि दर्शितः ।

इदमुपलक्षणं- जलं घ्राणग्राह्य गुणवत् , उत्पत्तिकालावच्छिन्नो घटः घ्राणग्राह्यगुणवानित्यादौ बाधानुपपत्तिरपिद्रष्टव्या ।

इति श्री महामहोपाध्याय श्री गदाधरभट्टाचार्य
विरचिता

अवच्छेदकतानिरुक्तिः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीः।

शास्त्रमुक्तावळी ।

श्रीम त्पंचगुरुभ्यो नमः ।

स प्त भ ङ्गी त र ङ्गि णी ।

वन्दित्वासुरवृन्देह वन्दितांघ्रिसरोरुहम् ।
श्रीवीरं कुतुका त्कुर्वे सप्तभङ्गीतरंगिणीम् ॥

इहखलु तत्त्वार्थाधिगमोपायं प्रतिपादयितुकामः सूत्रकारः " प्रमाणनयै रधिगम " इत्याह । तत्राधिगमो द्विविधः – स्वार्थः, परार्थश्चेति । स्वार्थाधिगमो ज्ञानात्मको मतिश्रुतादिरूपः । परार्थाधिगम श्शब्दरूपः । सच द्विविधः – प्रमाणात्मको नयात्मकश्चेति । कात्स्न्र्यत स्तत्त्वार्थाधिगमः प्रमाणात्मकः । देशत स्तत्त्वार्थाधिगमो नयात्मकः । अयं द्विविधोपि भेद स्सप्तधा प्रवर्तते, विधिप्रतिषेधप्राधान्यात् । इयमेव प्रमाणसप्तभंगी नयसप्तभंगीतिच कथ्यते । सप्तानां भंगानां – वाक्यानां, समाहारः - समूहः, सप्तभंगीति तदर्थः ।

तानिच वाक्यानि –

" स्या दस्त्येव घटः ॥ १ ॥
स्या न्नास्त्येव घटः ॥ २ ॥
स्या दस्ति नास्तिच घटः ॥ ३ ॥
स्या दवक्तव्य एव ॥ ४ ॥
स्या दस्तिचा वक्तव्यश्च ॥ ५ ॥

8

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्या न्नास्तिचा वक्तव्यश्च ॥ ६ ॥
स्या दस्ति नास्तिचा वक्तव्यश्च ॥ ७ ॥ " इति ॥

एत त्सप्तवाक्यसमुदाय स्सप्तभंगीति कथ्यते ।

तल्लक्षणन्तु (१) प्राश्निकप्रश्नज्ञान प्रयोज्यत्वे सति, एक-वस्तुविशेष्यका विरुद्धविधिप्रतिषेधात्मकधर्मप्रकारक बोधजनक सप्तवाक्यपर्याप्तसमुदायत्वम् । वर्तते चेदं लक्षणं दर्शितवाक्यसप्तके । तथाहि - प्राश्निकप्रश्नज्ञान प्रयोज्यत्वंहि परम्परया प्राश्निकप्रश्नज्ञानजन्यत्वम् । तथाच प्राश्निकप्रश्नज्ञानेन प्रतिपादकस्य विवक्षा जायते, विवक्षयाच वाक्यप्रयोग, इति – प्राश्निकप्रश्नज्ञानप्रयोज्यत्व मुक्त सप्तवाक्यसमुदायस्या क्षतम् । एवं घटादिरूपैक वस्तुविशेष्यका विरुद्धविध्यादिप्रकारको यो बोधः - घटोस्तीत्यादि रूपो बोधः, तज्जनकत्वंच वर्ततइति ।

तदिद माहु रभियुक्ताः –

" प्रश्नवशा देकत्र वस्तु न्यविरोधेन विधिप्रतिषेधकल्पना सप्तभंगी " इति ॥

अय मर्थः - 'प्रश्नवशा' दित्यत्र पञ्चम्याः प्रयोज्यत्व मर्थः । विधिप्रतिषेधकल्पने त्यस्य विधिप्रतिषेधप्रकारक बोधजनिकेत्यर्थः । 'अविरोधेने' ति तृतीयार्थो वैशिष्टयं विधिप्रतिषेधयो रन्वेति । 'एकत्र वस्तुनी' त्यत्र सप्तम्यर्थो विशेष्यत्वम् । तस्य कल्पनापदार्थबोधजनकत्वैकदेशे बोधेऽन्वयः । 'सप्तभंगी' त्यस्य सप्तवाक्य पर्याप्तसमुदायत्वाश्रयोर्थः । तथाचा स्मदुक्तलक्षणमेव पर्यवसन्नम् ।

---

(१) प्राश्निकः – प्रश्नकर्ता ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत्रच प्रत्यक्षादिविरुद्धविधिप्रतिषेधवाक्ये ऽवतिव्याप्तिवारणायाविरुद्धेति । घटोऽस्ति पटो नास्तीत्यादि समुदायवारणाय - एकवस्तुविशेष्यकेति । स्यादस्ति घटः, स्यान्नास्ति घटः, इति वाक्यद्वयमात्रे ऽतिव्याप्तिवारणाय सप्तेति । घटमानये त्युदासीन वाक्यघटित निरुक्तवाक्यसप्तके तिऽव्याप्तिवारणाय सप्तवाक्य पर्याप्तेति ।

यद्यपि सत्यन्तनिवेशस्या तिव्याप्त्यव्याप्त्यादि दोषवारकत्वं नसम्भवति, तथापि (१) प्रतिपाद्यप्रश्नानां सप्तविधानामेव सद्भावा त्सप्तैव भंगा इति नियमसूचनाय तन्निवेशनम् ।

ननु- प्रश्नानां सप्तविधत्वं कथं - इतिचेत्; जिज्ञासानां सप्तविधत्वात । (२) प्राश्निकनिष्ठ जिज्ञासाप्रतिपादक वाक्यंहि प्रश्न-इत्युच्यते ।

ननु- सप्तधैव जिज्ञासा कुतः, - इतिचेत्; सप्तधा संशयानामुत्पत्तेः । संशयानां सप्तविधत्वन्तु तद्विषयीभूत धर्माणां सप्तविधत्वात । तादृशधर्माश्च - कथञ्चित्सत्वं, कथञ्चिदसत्वं, क्रमार्पि-

---

(१) प्रतिपाद्यः - यस्मै प्रतिपादनीयं, सः । उत्तरवक्त्रा पुरुषेण प्रश्नकर्तु र्बोधजननायैवो त्तरवाक्यकथना त्प्रश्नकर्तैवात्र प्रतिपाद्य शब्देनोच्यते ।

(२) घट मजान न्पुरुष स्तज्जिज्ञासया ऽऽप्तं कंचि त्पुरुषम् पृच्छति को घट इति । सच कम्बुग्रीवादिमान् घट इत्युत्तरं वक्ति । तत्र को घट इति वाक्येन घट मजानतः पुरुषस्य तज्जिज्ञासा मवगत्यैवा प्तेनो त्तर मुक्तमि त्यंगीकार्यम् , अजिज्ञासितार्थकथनासम्भवात , अन्यथान्यस्यापि यस्य कस्यचि दुक्तिप्रसंगाच्च । तत्पुरुषीयघटविषयक जिज्ञासाज्ञानंच्या प्तस्य को घट इति वाक्येनैव जातम् । अतः प्रश्नो नाम जिज्ञासाविषयकज्ञानजनकं वाक्यमेव ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तोभयं, अवक्तव्यत्वं, कथश्चित्सत्वविशिष्टावक्तव्यत्वं, कथश्चिदस त्त्वविशिष्टावक्तव्यत्वम्, क्रमार्पितोभयाविशिष्टावक्तव्यत्वम्, चेति सप्तैव । एवञ्च दर्शितधर्मविषयका स्सप्तैव संशयाः । अत्र घट स्स्या दस्त्येववा नवेति कथश्चि त्सत्त्व तदभावकोटिकः प्रथमसंशयः।

ननुच – कथश्चित्सत्त्वस्याभावः कथश्चिदसत्त्वम्, तस्य न संशयविषयत्वसम्भवः, कथश्चित्सत्वेन साकं विरोधाभावात् । एक धर्मिक विरुद्ध नानाधर्मप्रकारकज्ञानंहि संशयः; नत्वेकधर्मिकनाना-धर्मप्रकारकज्ञानमात्रं. तथासति – अयंघटोद्रव्य मित्यादौ दन्त्वावच्छिन्न विशेष्यक घटत्वद्रव्यत्वरूपनानाधर्मप्रकारकज्ञानस्यापि संशयत्वापत्तेः । तथाच कथं घटस्स्यादस्त्येव न वेतिसंशयः? इतिचेत्;

उच्यते;– (१) दर्शितसंशये कथश्चिदस्तित्व सर्वथास्तित्वयोरेव-कोटिता; तथाच नोक्तानुपपत्तिः, तयोश्च परस्परम् विरुद्धत्वात् ।

अथ-कुत्रचित्प्रसिद्धयोरेव संशयकोटिता, यथा-स्थाणुत्वपुरुषत्वयोः, इह च कथश्चित्सत्त्वस्य प्रसिद्धत्वेपि सर्वथाऽसत्त्वस्य कुत्राप्यप्रसिद्धतया कथं संशयकोटित्वम्?–इति चेन्न । वस्तुतो प्रसिद्धस्यापि

---

(१) इदंच भावद्वयकोटिक संशयांगीकाराभिप्रायेण । भवतिहि भूतलं जलव दग्निमद्वेति । अतएव स्थाणुर्वा पुरुषोवेति स्थाणुत्व पुरुषत्व कोटिक स्संशयो प्युपपद्यते । एवंच कथंचि त्सत्त्वस्य किंचित्प्रकारावच्छिन्न सत्त्वरूपस्य सर्वथा सत्त्वस्य सर्वप्रकारावच्छिन्न सत्त्वरूपस्यच कोटित्वसम्भवा त्तदुभयकोटिक संशयोपपत्तिः। यदिच सर्वथा भावद्वयकोटिकं संशयो नास्त्येव, तदा सर्वथा सत्त्वस्य किंचिदवच्छिन्न सत्त्वाभावरूपत्वांगीकारेण कथंचि त्संशय निर्वाहः कार्यः। ग्रन्थकारस्त्वयं सर्वथा सत्त्वस्य सर्वप्रकारावच्छिन्न सत्त्वरूपतां वदन् भावद्वयकोटिकमेव संशय मभिप्रयाय ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रसिद्धत्वेन ज्ञातस्य सशंयविषयत्वसम्भवात । घटत्वावच्छिन्नसत्त्वस्यैकं कोटित्वं सर्वप्रकारावच्छिन्नत्वप्रकारेण सत्त्वस्य चापरं कोटित्वमिति वस्तुत स्सत्त्वे सर्वप्रकारावच्छिन्नत्वस्यासत्त्वेपि नक्षतिः । एवंद्वितीयादिसंशय प्रकारा अप्यूह्याः । निरुक्तसंशयेनच घटे गस्तवसत्त्वनिर्णय स्सम्पादनीय इति जिज्ञासोत्पद्यते ; जिज्ञासांप्रति संशयस्य कारणत्वात तादृशजिज्ञासया घटः किंस्यादस्त्येवेति प्रश्नः, प्रश्नेच जिज्ञासाया हेतुत्वात । तादृशप्रश्नज्ञानाच्च प्रतिपादकस्य प्रतिपिपादयिषाजायते । प्रतिपिपादयिषयाचोत्तरम् । इत्युक्तप्रणाळ्या धर्मसप्तविधत्वाधीनं भंगानां सप्तविधत्वमिति बोधयितुं सत्यन्तनिवेश इतिध्येयम् ।

तदुक्तम्:-

" भङ्गास्सत्त्वादयस्सप्त संशयास्सप्ततद्गताः ।
जिज्ञासास्सप्त सप्तस्युः प्रश्नास्सप्तोत्तराण्यपि ॥ " - इति ॥

नन्विदं सर्वं तदोपपद्यते, यदिधर्माणां सप्तविधत्वमेवेति सिद्धंस्यात ; तदेव नसंभवति । प्रथमद्वितीयधर्मेव त्प्रथमतृतीयादि धर्माणां क्रमाक्रमार्पितानां धर्मान्तरत्वसिद्धे स्सप्तविधधर्म नियमाभावात; इतिचेन्न ।

क्रमाक्रमार्पितयोः प्रथमतृतीयधर्मयो धर्मान्तरत्वेना प्रतीतेः । स्यादस्तिघट इत्यादौ घटत्वावच्छिन्न सत्त्वद्वयस्यासम्भवात , मृण्मयत्वाद्यवच्छिन्न सत्त्वान्तरस्य सम्भवेपि दारुमयत्वाद्यवच्छिन्नस्यापरस्या सत्त्वस्यापि सम्भवेना परधर्मसप्तकसिद्धे स्सप्तभंग्यन्तरस्यैवसम्भवात ।

एतेन - द्वितीय तृतीय धर्मयोः क्रमाक्रमार्पितयो धर्मान्तरत्व मिति निरस्तम्; - एकरूपावच्छिन्न नास्तित्वद्वयस्यासम्भवात ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नन्वेवं - प्रथमचतुर्थयो र्द्वितीयचतुर्थयो स्तृतीयचतुर्थयोश्च स हितयोः कथं धर्मान्तरत्वम् ; अवक्तव्यत्वंहि सहार्पितास्तित्वनास्ति त्वोभयम् , तथाच यथा क्रमार्पितास्तित्वोभयास्मि न्नास्तित्वस्य योजनं न सम्भवति , अस्तित्वद्वयाभावात ; तथा सहार्पितोभयस्मि न्नपीति- चेन्न । यतो ऽवक्तव्यत्वं सहार्पितोभयमेव न , किन्तु, सहार्पितयो रस्ति त्वनास्तित्वयो स्सर्वधा वक्तुमशक्यत्वरूपं धर्मान्तरमेव ; तथाच स त्वेनसहित मवक्तव्यत्वादिकं धर्मान्तरं प्रतीतिसिद्धमेव ।

प्रथमेभंगे सत्त्वस्य प्रधानभावेन प्रतीतिः, द्वितीयेपुनरसत्त्व- स्य, तृतीये क्रमार्पितयो स्सत्त्वासत्त्वयोः , चतुर्थेत्ववक्तव्यत्वस्य, प- ञ्चमे सत्त्वविशिष्टावक्तव्यत्वस्य , षष्ठेचा सत्त्वविशिष्टावक्तव्यत्वस्य, स- प्तमे क्रमार्पितसत्त्वासत्त्वविशिष्टा वक्तव्यत्वस्ये, तिविवेकः । प्रथ- मभंगादा वसत्त्वादीनां गुणभावमात्रं, नतु प्रतिषेधः ।

ननु - अवक्तव्यत्वं यदिधर्मान्तरं तर्हिवक्तव्यत्वमपि धर्मान्तरं- प्राप्नोति , कथं सप्तविधएव धर्मः ? तथाचाष्टमस्य वक्तव्यत्व धर्मस्य सद्भावेन तेन सहा ष्टभंगीस्यात् , न सप्तभंगी;-इतिचेन्न ।

सामान्येन वक्तव्यत्वस्या तिरिक्तस्या भावात । सत्त्वादिरूपेण व- क्तव्यत्वंतु प्रथमभंगादावे वान्तर्भूतम् । अस्तुवा वक्तव्यत्वंनाम कश्च- न धर्मोऽतिरिक्तः , तथापि वक्तव्यत्वावक्तव्यत्वाभ्यां विधिप्रतिषेधक- ल्पनाविषयाभ्यां सत्त्वासत्त्वाभ्यामिव सप्तभंग्यन्तरमेव प्राप्नोतीति- न सत्त्वासत्त्व प्रमुख सप्तविध धर्मव्याघातः । तथाच धर्माणां- सप्तविधत्वा त्तद्विषयसंशयादीनामपि सप्तविधत्वमिति सप्तभंग्या अ- धिकसंख्याव्यवच्छेद स्सिद्धः ।

नन्वेवंरीत्याऽधिकसंख्याव्यवच्छेदेपि न्यूनसंख्याव्यवच्छेदः कथं सिद्ध्यति ? तथाहि - यदिघटादा वस्तित्वप्रमुखा स्सप्त धर्माः प्रामा णिका स्स्युः, तदा तद्विषयसंशयातिक्रमेण सप्तभंगी सिद्ध्येत् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदेव न, सत्त्वासत्त्वयो र्भेदाभावात् । यत्स्वरूपेण सत्त्वं तदेव पररूपेणा सत्त्वं । तथाच न प्रथमद्वितीयभंगौ घटेते । तयो रन्यतरेणैव गतार्थत्वात् । एवंच तृतीयादिभंगाभावा त्कुतस्सप्तभंगी ? - इतिचेत् ।

अत्रोच्यते । स्वरूपाद्यवच्छिन्नं सत्त्वम् , पररूपाद्यवच्छिन्नम· सत्त्वमि त्यवच्छेदेकभेदा त्तयो र्भेदसिद्धेः । अन्यथा स्वरूपेणेव पर-रूपेणापि सत्त्वप्रसंगात् । पररूपेणेव स्वरूपेणा प्यसत्त्वप्रसंगाच्च ।

किंच सत्त्वंहि वृत्तिमत्त्वं, भूतले घटोस्तीत्यादौ भूतलनिरूपित वृत्तित्ववान्घटइति बोधात् । असत्त्वंचा भावप्रतियोगित्वम्,भूतलेघ-टोनास्तीत्यादौ भूतलनिष्ठाभावप्रतियोगी घट इतिबोधात् । तथाच-सत्त्वासत्त्वयो स्स्वरूपभेदोऽक्षतएव ।

अपिच-(१) ये त्रिरूपं हेतु मिच्छन्ति सौगतादयः । येवा (२) पञ्चरूप मिच्छन्ति नैयायिकादयः, तेषामुभयेषामपि हेतो स्सपक्षसत्त्वा-पेक्षया विपक्षासत्त्वं भिन्नमेवा भिमतं; अन्यथा स्वाभिमतस्य त्रिरूपत्व स्य पंचरूपत्वस्यवा व्याघातात् । - इति ।

अथैवमपि कथञ्चि त्सत्त्वापेक्षया क्रमार्पि तोभयस्य कोभेदः? न-हि प्रत्येकघटपटापेक्षया घटपटोभयंभिन्नम् । - इतिचेन्न;

प्रत्येकापेक्षयो भयस्य भिन्नत्वेन प्रतीतिसिद्धत्वात । अतएव - प्रत्येक घकार टकारापेक्षया क्रमार्पितोभयरूपं घटपद मतिरिक्त मभ्यु पगम्यते सर्वैः प्रवादिभिः । अन्यथा प्रत्येक घकाराद्यपेक्षया घट-पदस्याभिन्नत्वे घकाराद्युच्चारणेनैव घटपदज्ञानसम्भवेन घटत्वावच्छि

---

(१) पक्षसत्त्वं सपक्षसत्त्वं विपक्षासत्त्वं चेति हेतो धर्म त्रयमेव-साध्यसाधने ऽलमिति सौगताः ।

(२) नैयायिकाःपुन रबाधितत्व मसत्प्रतिपक्षितत्वंचेति रूपद्वयंमेळयित्वा पंचरूपोपन्नमेव लिंग मित्याहुः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

न्नोपस्थितिसम्भवा च्छेषोच्चारण वैयर्थ्य मापद्येत । अतएव प्रत्येकपुष्पापेक्षया मालायाः कथञ्चिद्भेद स्सर्वानुभवसिद्धः । इत्थंच कथञ्चित्सत्त्वासत्त्वापेक्षया क्रमार्पितोभय मतिरिक्तमेव ।

स्यादेतत् , क्रमार्पितो भयापेक्षया सहार्पितो भयस्य कथम् भेदः ? क्रमाक्रमयो श्शब्दनिष्ठत्वेना र्थनिष्ठत्वाभावात् । नहि घटादौ क्रमार्पितसत्त्वासत्त्वोभयापेक्षया ऽ क्रमार्पितसत्त्वासत्त्वोभय मतिरिक्त मस्ति । घटपटोभयाधिकरणे भूतले क्रमार्पित घटपटोभय मेकं सहार्पितघटपटोभयंचापरमिति नकेनाप्यनुभूयते ।

अथ क्रमार्पितसत्त्वासत्त्वोभयापेक्षया ऽ क्रमार्पितसत्त्वासत्त्वोभयस्य भेदाभावेपि नक्षतिः । अपुनरुक्त वाक्यसप्तकस्यैव सप्तभंगीपदार्थत्वेन सप्तधा वचनमार्गप्रवृत्ते र्निराबाधत्वात् । सत्त्वासत्त्वधर्मविषयतया सप्तधैव वचनमार्गाः प्रवर्तन्ते नातिरिक्ताः , पुनरुक्तत्वा दित्यत्र सप्तभंगी तात्पर्यात । स्वजन्यबोधसमानाकार बोधजनक वाक्योत्तरकालीन वाक्यत्वमेवहि पुनरुक्तत्वम् । प्रकृतेच तृतीयचतुर्थयो र्नेदृशं पौनरुक्त्यं सम्भवति , तृतीयभंग जन्यबोधे-अस्तित्वविशिष्टनास्तित्वस्य प्रकारतया चतुर्थभंगजन्यबोधे चास्तित्वनास्तित्वोभयस्य प्रकारतया तृतीयचतुर्थजन्यबोधयो स्समानाकारत्वविरहात् - इति चेन्न । तथास त्यधिकभंगस्य दुर्निवारत्वात् । तथाहि - यथा तृतीयचतुर्थयो रपौनरुक्त्यं विलक्षणबोधजनकत्वात् । तथा व्युत्क्रमार्पितस्य स्यान्नास्ति चास्तिचेति भंगस्य नास्त्यस्तित्वसहिता वक्तव्यत्वप्रतिपादक भंगान्तरस्यच्च नतृतीयसप्तमाभ्यां पौनरुक्त्यम् । अस्तित्वविशिष्टनास्तित्वप्रकारकबोधस्य तृतीयेन जननात , व्युत्क्रमप्रयुक्तेन नास्तित्वसहितास्तित्वप्रकारकबोधस्य जननाच्च विशेषणविशेष्यभावे वैपरीत्येन तादृशबोधयो स्समानाकारत्वाभावात् । एवं सप्तमेनापि व्युत्क्रमार्पि-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सोभयसहितावक्तव्यत्वप्रतिपादक भंगस्येति नवभंगी प्राप्नोति। इति चेत्।

अत्राहुः। तृतीये ऽस्तित्व नास्तीत्वोभयस्य प्रधानत्वम्। चतुर्थेत्वा वक्तव्यत्वरूप धर्मान्तरस्येति न तयो रभेदशंका। अवक्तव्यत्वंचा स्तित्व नास्तित्व विलक्षणम्। नहि सत्त्वमेव वस्तुनस्स्वरूपं, स्वरूपादिभि स्सत्वस्येव पररूपादिभि रसत्त्वस्यापि प्रतिपत्तेः। नाप्यसत्त्वमेव। स्वरूपादिभि स्सत्त्वस्यापि प्रतीति सिद्धत्वात्। नापि तदुभयमेव, तदुभयविलक्षणस्यापि जात्यन्तर स्य वस्तुनो नुभूयमानत्वात्। यथा - दधिगुड (१) चातुर्जात कादि द्रव्योद्भवं पानकंहि केवलदधिगुडाद्यपेक्षया जात्यन्तरत्वेन पानकमिदं सुस्वादु सुरभीति प्रतीयते। नचोभय विलक्षणत्वमेव-वस्तुन स्स्वरूपमिति वाच्यम्; वस्तुनि कथंचित्सत्त्वस्य कथंचि दसत्त्वस्यच प्रतीतेः। दधिगुड चातुर्जातकाद्युद्भवे पानके दध्यादि प्रतिपत्तिवत्। एवमुत्तरत्रापि बोध्यम्। तथाच विविक्तस्वभावानां सप्तधर्माणां सिद्धे स्तद्विषय संशयजिज्ञासादि क्रमेण सप्तमतिवचनरूपा सप्तभंगी सिद्धेति॥

इयंच सप्तभंगी द्विविधा - प्रमाणसप्तभंगी नयसप्तभंगीचेति। किंपुनः प्रमाणवाक्यम्, किंवा नयवाक्यमिति चेत?

अत्र केचित; - सकलादेशः प्रमाणवाक्यं, विकलादेशो नयवाक्यम्. अनेकधर्मात्मक वस्तुविषयक बोधजनक वाक्यत्वं सकलादेशत्वं, एकधर्मात्मकवस्तुविषयक बोधजनकवाक्यत्वं विकलादेशत्वं इत्याहुः।

---

(१) लवंगत्वक्, पत्रकं, नागकेसरः, एलाचेति चतुर्णां वस्तूनां चातुर्जातकमितिनाम। 'सकेसरं चतुर्जातं त्वक्पत्रैल स्त्रिजातक' मि त्यष्टांगहृदये।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तेषां प्रमाणवाक्यानां नयवाक्यानांच सप्तविधत्व व्याघातः । प्रथमद्वितीय चतुर्थभङ्गानां सत्त्वासत्त्वावक्तव्यत्वरूपै कैक धर्मात्मक-वस्तुविषयक बोधजनकानां सर्वथा विकलादेशत्वेन नयवाक्यत्वापत्तेः तृतीय पंचम षष्ठ सप्तमाना मनेकधर्मात्मकवस्तुविषयक बोधजनका-नां सदा सकलादेशत्वेन प्रमाणवाक्यतापत्तेः । नच त्रीण्येव नय-वाक्यानि चत्वार्येव प्रमाणवाक्यानीति वक्तुं युक्तं । सिद्धान्त-विरोधात् ।

यत्तु धर्माविषयक धर्मिविषयक बोधजनकवाक्यत्वं सकलादेश-त्वं, धर्म्यविषयक धर्मविषयक बोधजनकवाक्यत्वम् विकलादेशत्व-मिति - तन्न । -सत्त्वाद्यन्यतमेनापि धर्मेणा विशेषितस्य धर्मिण श्शा ब्दबोध विषयत्वासम्भवात , धर्मिवृत्तित्वा विशेषितस्य धर्मस्यापि तथात्वा द्युक्तलक्षणस्या सम्भवात् ।

नच- स्याज्जीव एवे त्यनेन धर्मिमात्रविषयकबोधस्य जनना त्स्याद स्त्येवेत्यनेन केवलधर्मविषयकबोधस्य जननाच्च नासम्भवइति वाच्यं ; यतो जीवशब्देन जीवत्वरूप धर्मावच्छिन्नस्यैव जीवस्याभिधानम् - नतु केवलधर्मिणः, अस्तिशब्देन च यत्किंचिद्धर्मिवृत्तित्व विशेषित-स्यैवा स्तित्वस्याभिधानम् - नतु केवल धर्मस्ये, ति सर्वानुभव-साक्षिकम् ।

नचैवं - द्रव्यशब्दस्य भावशब्दस्यच विभागानुपपत्तिरितिवा-च्यम्;-यतो मुख्यतया द्रव्यप्रतिपादकश्शब्दो द्रव्यशब्दः, यथा -जीव शब्दः, जीवशब्देनहि जीवत्वरूप धर्मो गौणतया प्रतिपाद्यते - जीवद्र व्यं मुख्यतया । एवं - मुख्यतया धर्मप्रतिपादकश्शब्दो भावशब्दः, यथा - अस्त्यादिशब्दः , तेनहि - अस्तित्वरूप धर्मस्य मुख्यतया प्र-तिपादनम् , धर्मिणश्च गौणतया । इति द्रव्यभावशब्दयो र्विभाग उपपद्यत इति ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यदपि - पाचकोयमिति द्रव्यशब्दः, पाचकत्वमस्येति भावशब्दः, इति द्रव्यभावशब्दयो र्विभाग निरूपणम्; तदपि न संगच्छते। पाचकशब्देनापि पाचकत्वधर्म विशिष्टस्यैव पुरुषस्याभिधानात्; पाचकत्वमित्यनेनापि पाचकवृत्तित्व विशेषितस्यैव धर्मस्य बोधनात्; - इति॥

अपरेतु - स्यादस्तीत्यादिवाक्यं सप्तविधमपि प्रत्येकं विकलादेशः, समुदितं सकलादेशः; – इतिवदन्ति।

अत्र चिन्त्यते – कुत स्स्यादस्तीत्यादिवाक्यम् प्रत्येकम् विकलादेशः ?

ननु - सकलार्थ प्रतिपादकत्त्वाभावा द्विकलादेश इति चेन्न । – तादृशवाक्यसप्तकस्यापि विकलादेशत्वापत्तेः, समुदितस्यापि सदादिवाक्यसप्तकस्य सकलार्थ प्रतिपादकत्वाभावात; सकलश्रुतंस्यैव सकलार्थ प्रतिपादकत्वात्।

एतेन - सकलार्थ प्रतिपादकत्वा त्सप्तभंगीवाक्यम् समुदितं सकलादेशः, इतिनिरस्तम्; समुदितस्यापि तस्य सकलार्थप्रतिपादकत्वासिद्धेः, सदादिसप्तवाक्येन एकानेकादि सप्तवाक्यप्रतिपाद्य धर्माण मप्रातिपादनात्।

सिद्धान्तविदस्तु " एकधर्मबोधन मुखेन तदात्मकानेकाशेष धर्मात्मक वस्तुविषयक बाधजनकवाक्यत्वम् सकलादेशत्वम्। तदुक्तम्।

' एकगुणमुखेना शेषवस्तु रूपसंग्रहा त्सकलादेशः' इति।

तस्यार्थः - यदा - अभिन्नंवस्तु एकगुणरूपेणोच्यते । गुणिनांगुणरूपमन्तरेण विशेषप्रतिपत्ते रसम्भवात; तदासकलादेशः, एकोहि जीवो ऽस्तित्वादि ष्वेकस्य गुणस्य रूपेण अभेदवृत्त्या, अभेदोपचारेणवा, निरंश स्समस्तो वक्तु मिष्यते ,विभागनिमित्तस्य तत्प्रतियोगिनो गुणान्तरस्या विवक्षितत्वात । कथमभेदवृत्तिः ? कथं वा ऽभेदोपचारः ? इतिचेत् । द्रव्यार्थत्वेनाश्रयणे तदव्यतिरेका दभेदवृ-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्तिः, पर्यायार्थत्वेनाश्रयणे परस्परव्यतिकरे प्येकत्वाध्यारोपा दभेदोपचारः । इति । अभेदवृत्त्यभेदोपचारयोरनाश्रयणे - एकधर्मात्मकवस्तुविषयबोधाजनकं वाक्यं विकलादेशः" । इतिप्राहुः ॥

तत्र धर्मान्तराप्रतिषेधकत्वे सति विधिविषयकबोधजनकवाक्यं प्रथमो भङ्गः । सच स्या दस्त्येव घट इति वचनरूपः । धर्मान्तराप्रतिषेधकत्वे सति प्रतिषेधविषयक बोधजनकवाक्यं द्वितीयो भङ्गः । सच स्या न्नास्त्येव घट इत्याकारः तत्र प्रथमवाक्ये घटशब्दो द्रव्यवाचकः, विशेष्यत्वात । अस्तीति गुणवाचकः, विशेषणत्वात ।

ननु - घटस्य रूपम् । फलस्य माधुर्यम् । पुष्पस्य गन्धः । जलस्य शैत्यम् । वायोः स्पर्शः । इत्यादौ गुणस्यापि विशेष्यत्वं दृश्यते ; द्रव्यस्यापि विशेषणत्वं ; इति चेत्सत्यम् । तथापि - समानाधिकरणवाक्ये - नीलमुत्फलं, शुक्लः पटः , सुरभि वायुः , इत्यादौ द्रव्यवाचकस्यैव विशेष्यत्वं गुणवाचकस्यैव विशेषणत्व मिति नियमात ॥

तत्र स्वरूपादिभि रस्तित्व मिव नास्तित्वमपि स्या दित्यनिष्टार्थस्य निवृत्तये स्या दस्त्येवेत्येवकारः । तेनच स्वरूपादिभि रस्तित्वमेव न नास्तित्व मित्यवधार्यते । तदुक्तम् -

" वाक्ये ऽवधारणं ताव दनिष्टार्थनिवृत्तये ।
कर्तव्य मन्यथा नुक्त समत्वा त्तस्य कुत्रचित् ॥ " इति ॥

ननु नानार्थस्थले गौरेवेत्यादौ सत्य प्यवधारणे ऽनिष्टार्थनिवृत्ते रभावात् , गा मानयेत्यादा वसत्य प्यवधारणे प्रकरणादिना निष्टार्थनिवृत्ते र्भावाच्च , नावधारणाधीना ऽन्यनिवृत्तिः । किञ्च - अन्यनिवृत्तिं कुर्व न्नेवकार एवकारान्तर मपेक्षतेवा ? नवा ? । आद्ये ऽनवस्थापत्तिः । द्वितीये यथै वकारप्रयोग एवकारान्तराभावेपि प्रकरणादिना ऽन्यनिवृत्ति र्लभ्यते । तथा सर्वशब्दप्रयोगेपि प्रक-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रणादिना ऽन्यनिवृत्तेर्लाभसम्भवा देवकारप्रयोगो ऽनर्थकइति ॥

मैवम् । यत श्शब्दाम्नायपरिपाटी विरुद्ध्यते । तत्रहि ये शब्दा स्स्वार्थमात्रे ऽनवधारिते संकेतिता स्ते तदवधारणविवक्षाया मेवकार मपेक्षन्ते । तत्समुच्चयादिविवक्षायां चकारम् । यथा – घटमेवानय, घटं चानय, इति । य स्त्ववधारणे संकेतित स्तस्यच ना वधारणबोधन एवकारान्तरापेक्षा । यथा चकारस्य समुच्चयबोधने न चकारान्तरापेक्षा ॥

नच – निपातानां द्योतकत्वा देवकारस्य वाचकत्वं न सम्भवतीति वाच्यम् । निपातानां द्योतकत्वपक्षस्य वाचकत्वपक्षस्यच शास्त्रे प्रदर्शनात् । " द्योतका श्च भवन्ति निपाताः " इत्यत्र ' चशब्दा द्वाचकाश्च ' इति व्याख्यानात् ॥

परेतु – "निपातानां द्योतकतया न द्योतकस्य द्योतकान्तरापेक्षे त्यवधारणद्योतने नैवकार स्यैवकारान्तरा पेक्षा ; यथा प्रदीपस्य न प्रदीपान्तरापेक्षा, वाचकस्यच घटादिपदस्य युक्ता ऽवधारणबोधनार्थे वकारापेक्षा , ननु – द्योतकस्यापि द्योतकान्तरापेक्षा दृश्यते, एव मेवेत्यादौ - एवमिति मान्तनिपात स्यैवकारापेक्षणात् ; तथाच सर्वोपि द्योतको द्योत्यार्थे द्योतकान्तरापेक्ष स्स्यादि त्यनवस्था दुर्निवारेति चे न्न , तत्र एवंशब्दस्य स्वार्थवाचकत्वा दन्यनिवृत्तौ द्योतकापेक्षोपपत्तेः , निपातानां वाचकत्वस्यापि शास्त्रसम्मतत्वात् , अतएव - उपकुंभ मित्यादा वुपशब्देन कुंभशब्दस्य समास स्संगच्छते , अन्यथा - उपशब्दस्य द्योतकत्वेन समासो नस्यात् , द्योतकेन समासासम्भवात " इत्याहुः ॥

अत्र सौगताः– ' सर्वशब्दाना मन्यव्यावृत्तिवाचकत्वात् घटादिपदै रेव घटेतरव्यावृत्तिबोधना न्न तदर्थ मवधारणम् युक्तम् ' इति वदन्ति ।

तन्न;– घटादिशब्दा द्विविधरूपतया प्यर्थबोधस्या नुभवसिद्ध त्वात । यदिच शब्दा द्विविधरूपतया र्थबोधो ना नुभवसिद्ध इति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मन्यते । तदा कथ मन्यव्यावृत्तिशब्दो विधिरूपेणा न्यव्यावृत्तिं बोधयति । नच - अन्यव्यावृत्तेरपि तदितरव्यावृत्तिरूपेणैवा न्यव्यावृत्तिशब्दा द्बोधइति वाच्यम् । तथा सति तदन्यव्यावृत्तेरपि तदितरव्यावृत्तिरूपेण बोधस्य वक्तव्यतया ऽ नवस्थापत्तेरिति । तथाच ' वाक्ये ऽवधारणं ताव दनिष्टार्थनिवृत्तये ' इति सिद्धम् ॥

अयं चैवकारस्त्रिविधः , अयोगव्यवच्छेद बोधकः अन्ययोग व्यवच्छेद बोधकः अत्यन्ता योग व्यवच्छेद बोधकश्च । इति ।

तत्र विशेषणसंगतैवकारो ऽयोगव्यवच्छेद बोधकः , यथा - शंखः पाण्डरएवेति । अयोगव्यवच्छेदो नाम - उद्देश्यतावच्छेदक समानाधिकरणा भावा प्रतियोगित्वं । प्रकृतेचो द्देश्यतावच्छेदकं शंखत्वं , शंखत्वावच्छिन्न मुद्दिश्य पाण्डरत्वस्य विधानात , तथाच - शंखत्वसमानाधिकरणो योऽत्यन्ताभावः, न ताव त्पाण्डरत्वाभावः , किन्त्वन्याभावः , तदप्रतियोगित्वं पाण्डरत्वे वर्तत इति शंखत्वसमानाधिकरणाभावाप्रतियोगिपाण्डरत्ववान् शंख इ त्युक्त स्थले बोधः ।

विशेष्य संगतैव कारो ऽन्ययोगव्यवच्छेदबोधकः । यथा - पार्थएव धनुर्धरइति । अन्ययोगव्यवच्छेदो नाम विशेष्यभिन्नतादात्म्यादि व्यवच्छेदः । तत्रैवकारेण पार्थान्य तादात्म्याभावो धनुर्धरे बोध्यते । तथाच पार्थान्य तादात्म्याभावव द्धनुर्धराभिन्नः पार्थ इतिबोधः ॥

क्रियासंगतैवकारो त्यन्तायोग व्यवच्छेदबोधकः , यथा - नीलं सरोजं भवत्ये वेति । अत्यन्तायोगव्यवच्छेदो नाम - उद्देश्य तावच्छेदक व्यापकाभावा प्रतियोगित्वं । प्रकृतेचो द्देश्यतावच्छेदकं सरोजत्वम् , तद्धर्मावच्छिन्ने नीलाभेदरूप धात्वर्थस्य विधानात । सरोजत्वव्यापको योऽत्यन्ताभावः, न ताव न्नीलाभेदा भावः, कस्मिंश्चित्सरोजे नीलाभेदस्यापि सत्वात , अपि त्वन्याभावः, त-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दप्रतियोगित्वं नीलाभेदे वर्तत इति सरोजत्वव्यापकात्यन्ताभावा प्रतियोगि नीलाभेदव त्सरोज मि त्युक्तस्थले बोधः।

नन्वेवं - स्यादस्त्येव घट इत्यादा वत्यन्तायोग व्यवच्छेदबोधके नैव कारेण भवितव्यम् , क्रियासंगतत्वात्; एवंच विवक्षिता र्थासिद्धिः , कस्मिन्श्चिद्घटे ऽ स्तित्वस्याभावेपि तादृशप्रयोग सम्भ वात्। यथा कस्मिन्श्चित्सरोजे नीलत्वस्या भावेपि नीलसरोजं भवत्येवेति प्रयोगः। इति चेन्न। -- प्रकृते ऽ योगव्यवच्छेद बोधकस्यै वैवकारस्य स्वीकृतत्वात, क्रियासंगत स्यैवकारस्यापि क्कचि दयोगव्यवच्छेद बोधकत्व दर्शनात्। यथा - ज्ञानमर्थं ग्रह्णात्येवेत्यादौ ज्ञानत्वसमानाधिकरणा त्यन्ताभावा प्रतियोगित्वस्या र्थग्राहकत्वे धात्वर्थे बोधः। तत्राप्य त्यन्तायोग व्यवच्छेदबोधस्योपगमे ज्ञानमर्थं गृह्णात्येवेतिव ज्ज्ञानं रजतं गृह्णात्येवेति प्रयोगप्रसंगः। सकलज्ञानेषु रजतग्राहकत्वस्याभावेपि यत्किंचिज्ज्ञाने रजतग्राहकत्व सत्वेनैव ज्ञानं रजतं गृह्णात्येवे त्यत्यन्ता योगव्यवच्छेद बोधकैवकारप्रयोगस्य निर्बाधत्वात। तद्व त्प्रकृते क्रियासंगतोऽप्ययोगव्यवच्छेद बोधक एवकारः। स्यादस्त्येवघट इत्यादौ घटत्वसमानाधिकरणात्यन्ताभावा प्रतियोगित्वस्यै वकारार्थस्य धात्वर्थे ऽस्तित्वेन्वयेन घटत्वसमानाधिकरणो त्यन्ताभावाप्रतियो ग्यस्तित्ववान् घट इति बोधः। घटत्वसमानाधिकरणो योत्यन्ताभावः , न ताव दस्तित्वा त्यन्ता भावः, किन्त्वन्याभावः, तदप्रतियोगित्वस्या स्तित्वे सत्वात॥

अथ - घटत्वसमानाधिकरणो योऽत्यन्ताभाव इत्युक्ते ऽ स्तित्वात्यन्ताभावोपि भवितु मर्हति , अस्तित्वात्यन्ताभावस्य नास्तित्वस्य घटे सत्त्वात; तादृशाभावाप्रतियोगित्वंचा स्तित्वे बाधितं, इति निरुक्तवाक्येना स्तित्वाभावस्य नास्तित्वस्य घटे निषेधः प्राप्नोतीति चेत्। - उच्यते , प्रतियोगिव्यधिकरणाभावा प्रतियो-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गित्व मेवकारार्थः, तादृशाभावे – उद्देश्यतावच्छेदक सामानाधिकरण्यंचो द्देश्यबोधकपद समभिव्याहार लभ्यम् । शंखः पाण्डर एवेत्यादौ प्रतियोगिव्यधिकरणाभावा प्रतियोगित्वरूपै वकारार्थैकदेशे ऽभावे शंखत्वसामानाधिकरण्यस्य शंखपद समभिव्याहार लभ्यत्वात् । एवंच प्रकृते प्येवकारार्थः प्रतियोगिव्यधिकरणाभावा प्रतियोगित्वं , अभावे घटत्वसामानाधिकरण्यन्तु घटपद समभिव्याहारलभ्यं । तथाच घटत्वसमानाधिकरणः प्रतियोगि व्यधिकरणो योऽभावः, न ताव दस्तित्वाभावरूपं नास्तित्वं, तस्य प्रतियोगिना ऽस्तित्वेन समानाधिकरणत्वात । किन्त्वन्याभावः, तद प्रतियोगित्वं चास्तित्वे निर्बाधमिति ॥

अत्र प्रतियोगि वैयधिकरण्याप्रवेशे पूर्वोक्तरीत्या सर्वप्रकारेणाप्यस्तित्वप्रसक्त्या नास्तित्वनिषेधे प्राप्ते ऽस्तित्वैकान्त्यनिवृत्तिपूर्वक मनैकान्त्यद्योतनाय स्यात्कारः । स्यात्कारप्रयोगाधीनमे वैवकारार्थे प्रतियोगि वैयधिकरण्यं पूर्वं प्रवेशितम् ।

स्याच्छब्दस्य चानेकान्त विधिविचारादिषु बहुष्वर्थेषु सम्भवत्सु इहविवक्षावशा दनेकान्तार्थो गृह्यते । अनेकान्तत्वं नामानेक धर्मात्मकत्वं । अन्तशब्दस्य घटादा वभेदेना न्वयः । तथाचानेक धर्मात्मको घट स्तादृशास्तित्ववा निति बोधः ।

नच-स्याच्छब्देनैवा नेकान्तस्य बोधने ऽस्त्यादिवचन मनर्थकमितिवाच्यम् । स्याच्छब्देन सामान्यतोऽनेकान्तबोधनेपि विशेषरूपेणबोधनाया स्त्यादिशब्दप्रयोगात् ॥

तदुक्तम् –

" स्या च्छब्दा दप्यनेकान्त सामान्यस्या वबोधने ।
शब्दान्तरप्रयोगोत्र विशेषप्रतिपत्तये ॥ " इति ॥

यथा – वृक्षोन्यग्रोधः, इति वृक्षत्वेन रूपेण न्यग्रोधस्य बोधनेपि न्यग्रोधत्वेन रूपेण न्यग्रोधबोधनाय न्यग्रोधपदप्रयोगः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्या च्छब्दस्य द्योतकत्वपक्षेतु न्यायप्राप्तएवा स्त्यादिप्रयोगः । अस्त्यादिशब्दे नोक्तस्या नेकान्तस्य स्या च्छब्देन द्योतनात । स्या च्छब्दाप्रयोगे सर्वथैकान्तव्यवच्छेदेना नेकांतप्रतिपत्ते रसम्भवात्; एवकारावचने विवक्षितार्था प्रतिपत्तिवत् ।

न न्वप्रयुक्तोपि स्या च्छब्दो वस्तुनो ऽ नेकांतस्वरूपत्वसामर्थ्या त्प्रतीयते, सर्वत्रैवकारवत् , इति चे त्सत्यं; प्रतिपाद्यानां स्या द्वाद्न्यायकौशलाभावे वस्तुसामर्थ्या त्तदप्रतीत्या तेषां प्रतिपत्त्यर्थं तद्वावश्यकत्वात् । प्रतिपाद्यानां स्याद्वादकौशलेच स्या त्कारा प्रयोग इष्टएव । प्रमाणादिना ऽ नेकान्तात्मके समस्तवस्तुनि सिद्धे कुशलाना मस्ति घट इति प्रयोगेपि स्या द्वस्त्येव घट इति प्रतिपत्तिसम्भवात् ।

तदुक्तम्-

"सोऽप्रयुक्तोपि वा तज्ज्ञै स्सर्वत्रार्थात्प्रतीयते ।
यथैवकारोऽयोगादि व्यवच्छेदप्रयोजनः ॥ इति ॥"

ननु योस्तिघटादि स्स सर्वोपि स्वायत्तद्रव्यक्षेत्रकालभावैः, नेतरैः; । तेषा मप्रस्तुतत्वादेव निरासस्सम्भवात । तथाच स्यात्कारप्रयोगो व्यर्थ इतिचे त्सत्यम् । सतु तादृशोऽर्थ श्शब्दा त्प्रतीयमानः किदृशा त्प्रतीयेत इति चिन्तायां स्यात्कारः प्रयुज्यते । सच लिङन्त प्रतिरूपको निपातः ।

ननु स्याच्छब्दस्य द्योतकत्वपक्षे केनपुनश्शब्देना क्तोनेकान्तस्स्या च्छब्देन द्योत्यते;- इतिचेत -

अस्त्येवघट इत्यादिवाक्येना भेद वृत्त्या ऽभेदोपचारेणवा प्रतिपादितोऽनेकान्त स्स्याच्छब्देन द्योत्यतइति ब्रूमः । सकलादेशोहि यौगपद्येना शेषधर्मात्मकं घटादिरूप मर्थं कालादिभि रभेदवृत्त्या ऽभेदोपचारेणवा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रतिपादयति , सकलादेशस्य प्रमाणरूपत्वात् । विकलादेशस्तु क्रमेण भेदप्राधान्येन भेदोपचारेणवा सुनयैकान्तात्मकं घटादिरूप मर्थं प्रतिपादयति । विकलादेशस्य नयस्वरूपत्वात् ।

कः पुनः क्रमः? किंवायौगपद्यम् ? इतिचेदुच्यते । यदातावदस्ति त्वादिधर्माणां कालादिभिर्भेदविवक्षा, तदाऽस्त्यादिरूपैकशब्दस्य नास्ति त्वाद्यनेक धर्मबोधने शक्त्यभावात् क्रमः । यदातु तेषामेव धर्माणां कालादिभि रभेदेन वृत्त मात्मरूप मुच्यते, तदैकेना प्यस्त्यादिशब्देना-स्तित्वादिरूपैकधर्मबोधनमुखेन तदात्मकता मापन्नस्य सकलधर्मस्वरू-पस्य प्रतिपादन सम्भवा द्यौगपद्यम् ॥

केपुनः कालादयः ? इति चेदुच्यते । कालः , आत्मरूपम् , अर्थः, सम्बन्धः , उपकारः , गुणिदेशः, संसर्गः, शब्दः, इति । तत्र स्या दस्त्येव घट इत्यत्र यादृशकालावच्छेदेन घटादा वस्ति-त्वं वर्तते- तत्कालावच्छेदेन शेषानन्तधर्मा अपि घटे वर्तन्त इति तेषा मेककालावच्छिन्नैकाधिकरणनिरूपितवृत्तित्वं कालेना भेदवृत्तिः । यदेवास्तित्वस्य घटगुणत्वं स्वरूपं-तदेवा न्या नन्तगुणानामपि स्वरू-पमि त्येकस्वरूपत्व मात्मरूपणा भेदवृत्तिः । यएवच घटद्रव्यरूपो र्थो स्तित्वस्या धार स्सएवा न्यधर्माणाम प्याधारइ त्येकाधारवृत्तित्व मर्थेना भेदवृत्तिः । यएवचा विष्वग्भावः कथंचि त्तादात्म्यलक्षणो स्तित्वस्य सम्बन्ध स्सएवानन्तधर्माणामपी त्येकसम्बन्धप्रतियोगित्वं सम्बन्धेना भेदवृत्तिः । यएवचोपकारो स्तित्वस्य स्वानुरक्तत्व-करणम्-(१) उच्च स्ववैशिष्ट्यसम्पादनं, यथा- नीलरक्तादि

(१) एककार्यजनकत्व मुपकारेणा भेदवृत्तिः । अस्तित्वेन य स्वानुरक्तत्वकरणरूपं कार्यं क्रियते, तदेव नास्तित्वादिभिरपि क्रियतइ त्येककार्यजनकत्व मुपपन्नम् । स्वानुरक्तत्वकरणं च स्व

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गुणानां नीलरक्ताद्युपरंजनं नीलरक्तत्वादिगुणवैशिष्ट्यसम्पादनमेव , तदपि स्वप्रकारकधर्मिविशेष्यक ज्ञानजनकत्वपर्यवसन्नम् , अस्तित्वस्य स्वानुरक्तत्वकरणंहि अस्तित्वप्रकारक घटविशेष्यकज्ञानजनकत्वम् , तादृशोपकारएव नास्तित्वादिभि रशेषधर्मैः क्रियत इत्येककार्यजनकत्व मुपकारेणा भेदवृत्तिः । यद्देशावच्छेदेन घटादा वस्तित्वं वर्तते- तद्देशावच्छेदेनैव घटे नास्तित्वादिधर्माः , नतु कण्ठाद्यवच्छेदेना स्तित्वं - पृष्ठावच्छेदेन नास्तित्वमिति देशभेदः , इत्येकदेशावच्छिन्नवृत्तित्वं गुणिदेशेना भेदवृत्तिः । यएव चैकव स्त्वात्मना स्तित्वस्य संसर्ग स्सएवा परधर्माणामपी त्येकसंसर्गप्रतियोगित्वं संसर्गेणा भेदवृत्तिः ॥ ननु - सम्बन्धसंसर्गयोः को विशेषः? इतिचे दुच्यते । कथंचि त्तादात्म्यलक्षणे सम्बन्धे ऽ भेदः प्रधानं भेदो गौणः, संसर्गेतु भेदः प्रधान मभेदो गौणः, इति विशेषः । कथंचि त्तादात्म्यंहि कथंचि द्भेदाभेदोभयरूपम् । तत्र भेदविशिष्टाभेद स्सम्बन्ध इत्युच्यते । अभेदविशिष्टभेदश्च संसर्ग इत्यु-

---

वैशिष्ट्यसम्पादनरूपम् । नीलादिगुणै र्घटादिषु क्रियमाणस्य स्वानुरंजनरूपस्य स्वानुरक्तत्वकरणस्य नीलादिगुणवैशिष्ट्यसम्पादनरूपतादर्शनात । स्ववैशिष्ट्यसम्पादनमपि स्वप्रकारकधर्मिविशेष्यक ज्ञानजनकत्वरूपं पर्यवस्यति । घटादिषु क्रियमाणस्य नीलादिगुणवैशिष्ट्यसम्पादनस्य घटादिविशेष्यक नीलादिगुणप्रकारक ज्ञानजनकत्वापेक्षया ऽ तिरिक्तत्वादर्शनात् । एवंच स्वानुरक्तत्वकरण मन्तत स्स्वप्रकारकधर्मिविशेष्यक ज्ञानजनकत्वरूपमेव निष्पन्नम् । तथाचा स्तित्वेना स्तित्वप्रकारक घटविशेष्यकज्ञानस्येव नास्तित्वेन नास्तित्वप्रकारक घटविशेष्यकज्ञानस्य जनना दस्तित्वनास्तित्वयो स्स्वप्रकारकधर्मिविशेष्यकज्ञानजनकत्वपर्यवसन्न स्वानुरक्तत्वकरण रूपैककार्यजनकत्वा दुपकारेणा भेदवृत्ति रुपपद्यते ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

च्यते । यएवास्तीति शब्दो स्तित्वधर्मात्मकस्य वस्तुनो वाचक स्सए-वा शेषानन्त धर्मात्मकस्यापि वस्तुनो वाचकइ त्येकशब्द वाच्यत्वं शब्देना भेदवृत्तिः । एवं कालादिभिरष्टविधा ऽभेदवृत्तिः पर्यायार्थिक नयस्य गुणभावे द्रव्यार्थिकनयप्राधान्या दुपपद्यते ।

द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्येतु नेयं गुणानां मभेदवृत्ति स्सम्भवति । तथाहि – तत्र कालेन ताव दभेदवृत्ति र्न-सम्भवति, समकाल मेकत्र नानागुणानां परस्परविरुद्धाना मसम्भवा त; प्रतिक्षणं वस्तुनो भेदात । सम्भवे वा तावदाश्रयस्य तावत्प्र-कारेण भेदप्रसंगात् ॥ ना प्यात्मरूपेणा भेदवृत्ति स्सम्भवति नाना गुणानां स्वरूपस्य भिन्नत्वात ; स्वरूपाभेदे तेषां परस्परभेदस्य विरोधात ॥ नाप्यर्थेनाभेदवृत्तिः, स्वाश्रयार्थस्यापि नानात्वात , अन्यथा नानागुणाश्रय स्यैकत्व विरोधात् ॥ नापि सम्बन्धेना भेदवृत्तिः, सम्बन्ध-स्यापि सम्बन्धिभेदेन भेददर्शनात ; यथा दण्डदेवदत्त सम्बन्धा दन्य श्छ-त्रदेवदत्त सम्बन्धः ॥ नाप्युपकारेणाभेदः, अनेकगुणैः क्रियमाण-स्य चोपकारस्य प्रतिनियत रूपस्या नेकत्वात्; अनेकै रुपकारिभिः क्रिय-माणस्यो पकारस्यै कत्व विरोधात ॥ नापि गुणिदेशाभेदः, गुणिदेशस्यापि प्रतिगुणं भेदात , तदभेदे भिन्नार्थगुणानामपि गुणिदेशाभेदप्रसंगात ॥ नापि संसर्गेणाभेदः , संसर्गस्यापि संसर्गिभेदेन भेदात , तदभेदे संसर्गि भेदविरोधात् ॥ नापि शब्देनाभेदः , शब्दस्यार्थभेदेन भि-न्नत्वात् , सर्वगुणाना मेकशब्दवाच्यतायां सर्वार्थाना मेकशब्द वाच्यता पत्त्या शब्दान्तरवैफल्यापत्तेः ॥ एवं तत्वतो स्तित्वादीना मेकत्र वस्तु न्य भेदवृत्ते रसम्भे कालादिभि भिन्नानामपि गुणाना मभेदोपचारः क्रियते ।

एवं निरूपिताभ्या मभेदवृ त्त्यभेदोपचाराभ्या मेकेना स्तिनास्त्या दिशब्देनो पात्तस्या शेषधर्मात्मकस्य घटादिवस्तुनः स्यात्कारो द्योतक-स्समवतिष्ठते । इत्येवं पदार्थोनिरूपितः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वाक्यार्थो निरूप्यते। स्यादस्त्येव घटः, स्यान्नास्त्येव घटः, इत्यस्य स्वरूपाद्यवच्छिन्नास्तित्वाश्रयोघटः, पररूपाद्यवच्छिन्न नास्तित्वाश्रयोघटः, इतिच बोधः। घटादिरूपे वस्तुनि स्वरूपादिना सत्त्वम् पररूपादिनाऽसत्त्वञ्चां गीकरणीयम्। अन्यथा वस्तुत्वस्यैव विलयापत्तेः स्वपररूपोपादानापोहन व्यवस्थाप्यांह वस्तुनो वस्तुत्वम्।

तत्र घटस्य किं स्वरूपम्? किंवा पररूपम्? इतिचेत्; –घट इत्यादिबुद्धौ प्रकारतया भासमानो घटपदशक्यतावच्छेदकीभूत सदृशपरिणामलक्षणो यो घटत्वनामको धर्म स्सघटस्य स्वरूपं, पटत्वादिकं पररूपम्। तत्र घटत्वादिरूपेणेव पटत्वादिरूपेणापि घटस्य सत्त्वे घटस्य पटात्मकत्वप्रसंगः, पटत्वादिनेव घटत्वादिना प्यसत्त्वे सर्वथा शून्यत्वापत्तिः, शशविषाणवत्।

अथवा-नामस्थापनाद्रव्यभावानां मध्ये यो विवक्षित स्तत्स्वरूपं, इतरत्पररूपम्। तत्र विवक्षितेन रूपेणास्ति अविवक्षितेननास्ति। यदि विवक्षितेनापि रूपेण नास्ति, तर्हि शशविषाणव दसत्त्वमेव घटस्य प्राप्नोति। यदिचा विवक्षितेनापि रूपेणास्ति, तदा नामादीनां परस्परभेदो नस्यात्।

अथवा - घटत्वावच्छिन्नेषु मध्ये यादृशघटः परिगृह्यते, तन्निष्ठस्थौल्यादि धर्मः स्वरूपं, इतरघटादिव्यक्तिवृत्ति धर्मएव पररूपम्। तत्र तादृशस्वरूपेणास्ति, पररूपेणनास्ति। स्वरूपेणा प्यस्तित्वानंगीकारेऽसत्त्वप्रसंगः पूर्ववत्। एवमग्रेपि। तादृशोघटो यदि निरुक्त पररूपेणाप्यस्ति, तदा सर्वघटाना मैक्यप्रसंगा त्सामान्याश्रय व्यवहार विलोपापत्तिः।

अथवा - तस्मिन्नेव घटविशेषे कालान्तरावस्थायिनि पूर्वोत्तर कुसूलान्त कपाला द्यवस्थाकलापः पररूपं, तदन्तरालवृत्ति घटपर्याय स्सस्वरूपं, तेन रूपेणास्ति। इतररूपेणनास्ति। यदि कु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सूलान्तकपालाद्यात्मनापि घटोस्ति, तदा घटावस्थायां घटपर्यायस्येव कुसूलादिपर्यायस्या प्युपलब्धिप्रसंगः । कुसूलाद्यवस्थायामपि घटसत्वे घटपर्यायोत्पत्ति विनाशार्थं गुरुप्रयत्न वैफल्यंच । एवं - अन्तराळवृत्ति घटपर्यायात्मनापि यदि घटो नास्ति, तदा तत्काले जलाहरणादिरूपं तत्कार्यं नोपलभ्येत ।

अथवा - घटादौ प्रतिक्षणं सजातीयपरिणामो जायत इतितात्र सिद्धान्तसिद्धम् । तत्र ऋजुसूत्रनयापेक्षया वर्तमानक्षणवृत्ति घटपर्यायः स्वरूपं, अतीतानागत घटपर्यायएव पररूपं । तत्क्षणवृत्ति स्वभावेन सता घटोस्ति, क्षणान्तरवृत्ति स्वभावेन नास्ति, तथा प्रतीतेः । तत्क्षणवृत्तिस्वभावेनेव क्षणान्तरवृत्ति स्वभावेना प्यस्तित्वे एकक्षणवृत्त्येव सर्वं स्यात । क्षणान्तरवृत्तिस्वभावेन तत्क्षणवृत्ति स्वभावेना प्यस्तित्वाभावे घटाश्रयव्यवहारस्यैव विलोपापत्तिः । विनष्टानुत्पन्न घटव्यवहाराभावात ।

अथवा - तस्मिन्नेव तत्क्षणवर्तिनि रूपादिसमुदायात्मके घटे पृथुबुध्नोदराद्याकारः स्वरूपं, इतराकारः पररूपं । तेन पृथुबुध्नोदराद्याकारेण घटोस्ति, इतराकारेणनास्ति; पृथुबुध्नोदराद्याकारसत्वे घट व्यवहारसत्वं तदभावेतदभावइति ताद्दशाकारनियतत्वा त्तद्व्यवहारस्य । पृथुबुध्नोदराकारेणा प्यस्तित्वाभावे घटस्या सत्वापत्तिः, इतराकारेणा प्यस्तित्वे ताद्दशाकारशून्ये पटादावपि घटव्यवहारप्रसंगः ॥

अथवा - रूपादिविशिष्टो घट श्चक्षुषागृह्यते इत्यस्मि न्व्यवहारे रूपमुखेन घटोगृह्यतइति रूपं स्वरूपं, रसादिःपररूपं । तत्र रूपात्मनास्ति, चक्षु रिन्द्रियमात्र ग्राह्यत्वात । यदि चक्षु र्जन्यज्ञानविषयत्वं रसस्या प्यंगीक्रियते, तदा रसनादीन्द्रियकल्पना व्यर्था । यदि च रसादेरिव रूपस्यापि चक्षुरिन्द्रिय-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जन्यज्ञानविषयता नस्या त्तदा घटस्यैवा ग्रहणप्रसंगः, रूपादिज्ञान नियतत्वात् घटादिज्ञानस्य ।

अथवा – शब्दभेदे ध्रुवोऽर्थभेदइति घटकुटादिशब्दानाम प्यर्थभेद स्समभिरूढनयार्पणात् । घटनात घटः - कौटिल्या त्कुट - इति त त्क्रियापरिणतिक्षणएवः शब्दस्य वृत्ति र्युक्ता । तत्र घटनक्रिया विषयकर्तृत्वं स्वरूपं , इतरत्पररूपं। तत्राद्येना स्ति , इतरेण ना-स्ति । इत्यादिरीत्या स्वरूपपररूपभेदा ऊह्याः ॥

एवं घटस्य स्वद्रव्यं मृद्द्रव्यं , परद्रव्यं सुवर्णादि । घटो मृद्वात्मनास्ति, सुवर्णाद्यात्मना नास्ति । घटस्य स्वद्रव्यात्मनेव प-रद्रव्यात्मनापि सत्त्वे घटो मृदात्मको नसुवर्णात्मक इति नियमो न-स्यात् । तथाच द्रव्य प्रतिनियम विरोधः ।

ननु संयोगविभागादै रनेकद्रव्याश्रयत्वेपि मद्रव्यप्रतिनियमो विरुद्ध्यत इति चेन्न । तस्या नेकद्रव्यगुणत्वेना नेकद्रव्यस्यैव स्वद्रव्यत्वात् , स्वानाश्रयद्रव्यान्तरस्यैव परद्रव्यत्वात् । स्वाना श्रयद्रव्यात्मनापि संयोगादे स्सत्वे स्वाश्रयद्रव्यप्रतिनियमव्याघातस्य तदवस्थत्वात । तथा परद्रव्यात्मनेव स्वद्रव्यात्मनापि घटस्या सत्त्वे सकलद्रव्यानाश्रयत्वप्रसंगेन निराश्रयत्वापत्तिः ।

एवं घटस्य स्वक्षेत्रं भूतलादि , परक्षेत्रं कुड्यादि । घटः स्व-क्षेत्रेस्ति, परक्षेत्रे नास्ति । घटस्य स्वक्षेत्रइव परक्षेत्रेपि सत्त्वे प्रतिनियतक्षेत्रत्वानुपपत्तिः । परक्षेत्रइव स्वक्षेत्रे प्यसत्त्वेच नि-राधारत्वापत्तिः ।

तथा घटस्य स्वकालो वर्तमानकालः , परकालोऽतीतादिः । तत्र-स्वकालेऽस्ति, परकालेनास्ति । घटस्य स्वकालइव परकालेपि सत्त्वे प्रति नियतकालत्वाभावेन नित्यत्वमेव स्यात । परकालइव स्वकालेप्यसत्त्वे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सकलकालासम्बन्धित्वप्रसंगेना वस्तुत्वापत्तिः । कालसम्बन्धित्वमेव हि वस्तुत्वं । एवञ्च घटो घटत्वेनास्ति, पटत्वेन नास्ति, मृद्द्रव्येणास्ति, सुवर्णद्रव्येण नास्ति, स्वक्षेत्रादस्ति, परक्षेत्रान्नास्ति, स्वकालादस्ति, परकालान्नास्तीति पर्यवसन्नं ।

अत्रायं बोधप्रकारः – घटत्वेनेति तृतीयार्थोऽवच्छिन्नत्वं, धात्वर्थेन्वेति । असधात्वर्थोऽस्तित्वं सत्त्वपर्यवसन्नं । आख्यातार्थं आश्रयत्वं । तथाच-घटत्वावच्छिन्नास्तित्वाश्रयो घट इति प्रथमवाक्याद्बोधः । अभावाना मधिकरणात्मकतया पटत्वावच्छिन्नाभावस्य घटस्वरूपत्वात्, तत्र नञ्समभिव्याहृता सधातोरभावोर्थः, आश्रयत्वमाख्यातार्थः, इति रीत्या तादृशाभावाश्रयो घट इति बोधेपि तादृशाभावात्मकत्वमेव घटस्य सिद्ध्यति, अभावाना मधिकरणात्मकत्वात् । तृतीयवाक्ये मृद्द्रव्यपदोत्तर तृतीयाया अवच्छिन्नत्व मर्थः । एवमग्रेपि बोधा ऊह्याः ॥

ननु – सर्वपदार्थानामपि स्वरूपादिचतुष्टय पररूपादिचतुष्टयाभ्यां व्यवस्थाया मंगीक्रियमाणायां स्वरूपादीनां स्वरूपाद्यन्तरस्याभावात्कथं व्यवस्था स्यात् ? तेषामपि स्वरूपाद्यन्तरसद्भावे ऽ नवस्था प्रसंगात्, सुदूरमपि गत्वा स्वरूपाद्यन्तराभावेपि कस्यचिद्व्यवस्थायां किं स्वपररूपाद्यपेक्षया सत्त्वासत्त्वसमर्थनरूपया स्वगृहमान्यया प्रक्रियया ? यथा प्रतीति वस्तु व्यवस्थोपपत्तेः ॥ इति – चेत् – अनभिज्ञो भवान् वस्तुस्वरूपपरीक्षायाः । वस्तुस्वरूप प्रतीतिरेव स्वपररूपाद्यवच्छिन्न सत्त्वासत्त्वादिकं विषयी करोतीति निरूपयितु मुपक्रान्तत्वात् । अन्यथा नानानिरंकुशविप्रतिपत्तीनां निवारयितु मशक्तेः । वस्तुनोहि यथैवा बाधितप्रतीति स्तथैव स्वरूपव्यवस्था, ' मानाधीनामेयसिद्धिः ' इतिवचनात् । एवञ्च-स्वरूपादीनां

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वरूपाद्यन्तरं प्रतीयतेवा नवा ? अन्त्ये स्वरूपाद्यन्तरं नांगीक्रियतएव । एवमपि तेषा मस्तित्व नास्तित्व व्यवस्था ऽग्रे प्रपञ्चयिष्यते । आद्ये स्वरूपादीनामपि स्वरूपाद्यन्तर मंगीक्रियते , प्रतीत्यनुरोधात । न-चैव मनवस्था, यत्र स्वरूपाद्यन्तरस्य प्रतीति स्तत्र व्यवस्थोपपत्तेः । तत्र जीवस्य ताव दुपयोगसामान्यं स्वरूपं , तस्य तल्लक्षणत्वात् । 'उपयोगो लक्षण ' मिति वचनात् । ततोऽन्यो ऽनुपयोगः पररूपं । ताभ्यां सदसत्त्वे प्रतीयेते । उपयोगसामान्यस्य च ज्ञानदर्शनान्यत-रत्वं स्वरूपम् , इतर त्पररूपम् । उपयोगविशेषस्य ज्ञानस्य स्वा-र्थाकारनिश्चयात्मकत्वं स्वरूपम् , दर्शनस्य किंस्विदित्यादिरूपेणा का-रग्रहणम् स्वरूपम् । ज्ञानस्यापि परोक्षस्या वैशद्यं स्वरूपं । प्रत्यक्ष स्य वैशद्यं स्वरूम् । दर्शनस्यापि चक्षुरचक्षुर्निमित्तस्य चक्षुरादि जन्यार्थ ग्रहणं स्वरूपं । अवधिदर्शनस्या वधिविषयीभूतार्थ ग्रह णं स्वरूपम् । परोक्षस्यापि मतिज्ञानस्ये न्द्रियानिन्द्रियजन्यत्वेसति स्वार्थाकारव्यवसायात्मकत्वं स्वरूपम् । अनिन्द्रियमात्रजन्यत्वं श्रुत स्य स्वरूपम् । प्रत्यक्षस्यापि विकलस्या वधिमनःपर्यायलक्षण-स्ये न्द्रियानिन्द्रियानपेक्षत्वेसति स्पष्टतया स्वार्थव्यवसायात्मकत्वं स्व-रूपम् । सकलप्रत्यक्षस्य केवलज्ञानलक्षणस्य सकलद्रव्यपर्यायसा-क्षात्करणं स्वरूपम् । ततोन्य त्सत्त्वंतु पररूपम् । ताभ्यां सदसत्त्वे प्रतिपत्तव्ये । एव मुत्तरोत्तर विशेषाणामपि स्वरूपपररूपे बुद्धिम-द्भि रूह्ये । तद्विशेष प्रतिविशेषाणा मनन्तत्वात् ।

ननु-प्रमेयस्य किं स्वरूपं किंवा पररूपम्? याभ्यां प्रमेयं स्याद-स्ति स्यान्नास्तीति व्यपदिश्येतेतिचेत् ? उच्यते । प्रमेयस्य प्रमेयत्वं स्व-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

रूपं, घटत्वादिकं पररूपम् । प्रमेयं प्रमेयत्वेनास्ति, घटत्वादिना नास्ति ॥

अन्येतु – "प्रमेयस्य स्वरूपं प्रमेयत्वं, अप्रमेयत्वं पररूपम् । नच – अप्रमेयत्वं प्रमेयत्वाभाव स्सचाप्रसिद्ध इति वाच्यम्; प्रमेयत्वाभावस्य शशविषाणादौ प्रसिद्धत्वात् । नच – शशविषाणादीनां प्रमेयत्वाभावस्य च व्यवहारविषयत्वेन प्रमेयत्वापत्ति रिति वाच्यम्; तत्साधकप्रमाणाभावेन प्रमेयत्वासिद्धेः । प्रमेयत्वंहि प्रमाणजन्यप्रमितिविषयत्वम्, तच्च प्रमाणाभावे नोपपद्यते । एवञ्च निरुक्त स्वरूप पररूपाभ्याम् प्रमेयस्या स्तित्वनास्तित्वोपपत्तिः । " इत्याहुः ॥

ननु – जीवादिद्रव्याणां षण्णां किं स्वद्रव्यं किंवा परद्रव्यम्? याभ्या मस्तित्वनास्तित्वे व्यवतिष्ठेते, द्रव्यान्तरस्या सम्भवात्, इतिचे दुच्यते । तेषामपि शुद्धं सद्द्रव्य मपेक्ष्यास्तित्वम् तत्प्रतिपक्षं सद्भाव मशुद्धद्रव्य मपेक्ष्य नास्तित्व ञ्चोपपद्यते ॥

ननु – महासत्त्वरूपस्य शुद्धद्रव्यस्य स्वपरद्रव्यादिव्यवस्था कथं? तस्य सकलद्रव्यक्षेत्रकालभावात्मकत्वात्, तद्व्यतिरेकेणान्यद्रव्याद्यभावात्; इति चेन्न;– शुद्धद्रव्यस्यापि सकलद्रव्यक्षेत्रकालाद्यपेक्षया सत्त्वस्य, विकलद्रव्याद्यपेक्षया ऽसत्त्वस्यच, व्यवस्थितेः । 'सत्ता सप्रतिपक्षैका' इति वचनात् ।

एतेन सकलक्षेत्रकालव्यापिनो गगनस्य सकलकालक्षेत्रापेक्षया सत्त्वं यत्किञ्चि त्क्षेत्रकालापेक्षया ऽसत्त्वञ्च निरूपितम् प्रतिपत्तव्यम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ननु - अस्तित्वमेव वस्तुनस्स्वरूपं, नपुन र्नास्तित्वं, तस्य पर-रूपाश्रयत्वात्। यदिच पररूपाश्रितमपि नास्तित्वं वस्तुनः स्व-रूपं, तदा पटगतरूपादिकमपि घटस्य स्वरूपं स्यात्; इति चेन्न; उभयस्यापि स्वरूपत्वे प्रमाणसद्भावात्। तथाहि - घटस्य स्व रूपाद्यवच्छिन्नास्तित्वं पररूपाद्यवच्छिन्न नास्तित्वंच प्रत्यक्षेणैव गृह्यते। घटो घटत्वेनास्ति पटत्वेननास्ती त्यबाधित प्रतीतेः। अनु-मानप्रयोगश्च - अस्तित्वं स्वभावेना विनाभूतं- विशेषणत्वात, सा धर्म्यवत्। यथा साधर्म्यं वैधर्म्येणा विनाभूतं - तथास्तित्वं स्वभावेन नास्तित्वेना विनाभूतम्। अविनाभूतत्वंच नियमेनै काधिकरणवृत्तित्वम्॥

ननु - घटो ऽभिधेयः प्रमेयत्वा दित्यादिहेतौ वैधर्म्यविरहेपि सा-धर्म्यम् दृश्यतइति साधर्म्यस्य वैधर्म्याविनाभूतत्वाभावा न्न दृष्टान्तसंग तिः, इतिचेदुच्यते। साधर्म्यन्नाम साध्याधिकरणवृत्तित्वेन निश्चितत्वं। वैधर्म्यंच साध्याभावाधिकरणावृत्तित्वेन निश्चितत्वम्। एवंचा भिधे-यत्वाभावाधिकरणे शशशृंगादा नवृत्तित्वेन निश्चितत्वं प्रमेयत्वस्य वर्त त इति तादृशेहतो वैधर्म्य मक्षत मिति।

एवं-नास्तित्वं स्वाभावेना स्तित्वेना विनाभूतम्, विशेषणत्वात्। वैधर्म्यवत्, इत्यनुमानेनापि तयो रविनाभावसिद्धिः।

ननु-पृथिवीऽ तरेभ्योभिद्यते, गन्धवत्त्वा दित्यादि केवलव्यतिरेकि हेतौ वैधर्म्यं साधर्म्येण विनापि वर्ततइति निरुक्तानुमाने दृष्टान्तासंग-तिरितिचेन्न। केवलव्यतिरेकिहेतावपि साधर्म्यस्य घटादाविव सम्भ-वात। इतरभेदाधिकरणे घटे गन्धवत्त्वरूपहेतो र्निश्चितत्वेन साध र्म्यस्या क्षतत्वात्। पक्षभिन्नएव साधर्म्यं न पक्ष इति नियमाभावात्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अथ-शशविषाणादौ नास्तित्व मस्तित्वेन विनापि दृश्यते, इति चेत्? अत्र वदामः । गोमस्तकसमवायित्वेन यदस्तीति प्रसिद्धम् विषाणं, त च्छशादिमस्तकसमवायित्वेन नास्तीति निश्चीयते । मेषादिसमवायित्वेन यानि रोमाणि सन्तीति प्रसिद्धानि- तान्येव कूर्मादिसमवायित्वेन न सन्तीति निश्चीयन्ते । वनस्पति सम्बन्धित्वेन यदस्तीति प्रसिद्धं कुसुमं- तदेव गगनसम्बन्धित्वेन नास्तीति निश्चीयते । तथाचा स्तित्वं नास्तित्वंच परस्पर मविनाभूतमेव वर्तते ।

अपरंतु -" यथा देवदत्तादिशब्दानां देवदत्तशरीरावच्छिन्नात्मन्येव शक्तिः, (१) देवदत्तो जानाति सुखमनुभवतीत्यादि प्रयोगानुरोधात् , तथा मण्डूकादिशब्दानामपि मण्डूकादिशरीरावच्छिन्ना त्मन्येव शक्ति रंगीकरणीया । एवंच कर्मादेशवशा न्नानाजाति

---

(१) देहसम्बन्ध मन्तरा ऽऽत्मनो ज्ञानाद्यसम्भवात , शरीरस्य ज्ञानसुखाद्यवच्छेदकत्वात् शरीरस्य ज्ञानाश्रयत्वासम्भवाच्चेति भावः । अत्रच यद्यपि शरीरसंयोगमन्तरा ऽऽत्मनो ज्ञानसुखाद्यसम्भवेन शरीरस्य तदवच्छेदकत्वेपि देवदत्तादिशब्दानां शरीरावच्छिन्नात्म वाचित्व मावश्यकम् , नहि देवदत्त स्सन्ध्या मनुतिष्ठतीत्यादौ सन्ध्या वन्दनस्य द्विजत्वमन्तरा ऽ सम्भवात् द्विजत्वादिकमपि देवदत्तशब्दस्यार्थो भवति । तथापि देवदत्तादिशब्दानां शरीरमात्रपरत्व वादिमत खण्डनेन आत्मवाचित्वस्थापने तात्पर्या न्न दोषः । उक्तप्रयोगयो र्देवदत्तशब्दस्या त्ममात्र वाचित्वेपि देवदत्तो गौर इत्याद्यनुरोधेन शरीरस्यापि तत्पदवाच्यत्व मावश्यकमिति ध्येयम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सम्बन्ध मापन्नस्य जीवस्य (१) मण्डूकभवावाप्तौ तत्पदवा-च्यता मास्कन्दतः पुन र्युवतिजन्म न्यवाप्ते यश्शिखण्डक स्सएवायमिति प्रत्यभिज्ञानविषयै कजीव सम्बन्धित्वा त्सएव मण्डूकशिखण्ड इति तस्य प्रसिद्धत्वा न्मण्डूक शिखण्डस्या स्तित्वम् ; मण्डूकशरीरावच्छि न्नात्मसम्बन्धिनो मण्डूकशरीर समानकालीन शिखण्डस्याभावाच्च - नास्तित्वम् । यद्विच देवदत्तादिशब्दो मण्डूकादिशब्दश्च तत्त-च्छरीरवाचकएव , देवदत्तउत्पन्नो विनष्ट इत्यादि व्यवहारात्, सच बन्धम्प्र त्येकत्वेन वर्तमानस्य जीवस्यापि बोधको भवतीति मतं । तदा मण्डूकशरीराकारेण परिणत पुद्गल (२) द्रव्यस्या प्यनाद्यन्त-परिणामस्य क्रमेण युवतिभुक्ताहारादि केशभावान्त परिणामा च्छि खण्डक निष्पत्ते र्मण्डूकशिखण्डस्यास्तित्वम् , मण्डूकशरीररूपेण परिणतपुद्गलद्रव्यस्य तत्काले केशपरिणामाभावाच्च नास्तित्वं सि-द्ध्यति । एवं वन्ध्यापुत्र शशनरखरविषाण कूर्मरोमादिष्वपि योज्यम् । आकाशकुसुमेतु - अस्तित्व नास्तित्वो पपत्तिरित्थम् । यथा - वनस्पतिनाम कर्मोदयापादित विशेषस्य वृक्षस्य पुष्पमिति व्य-पदिश्यते , पुष्पभावेन परिणतपुद्गलद्रव्यस्य तादृशवृक्षापेक्षया भि-न्नत्वेपि तेन व्याप्तत्वात् ; तथाऽऽकेशेनापि पुष्पस्य व्याप्तत्वं समान मि त्याकाश कुसुम मिति व्यपदेशो युक्तः ॥ अथ मल्लिकाकृ तो पकारापेक्षया मल्लिकाकुसुम मिति व्यपदिश्यते , नत्वाकाशकुसुम

---

(१) मण्डूकभवावाप्तिः - मण्डूकजन्मप्राप्तिः ।

(२) एतन्मते परमाणुस्थानीयं पुद्गलाख्यं द्रव्य मंगीक्रियते। परमाणुरेव वा ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मिति ; कुसुमस्याकाशेनोपकाराभावात् , इति चेन्न ; – आका- शकृता वगाहनरूपो पकार मादाया काशकुसुम मिति व्यपदेशस्य दु र्वारत्वात् ॥ किंच – वृक्षा त्प्रच्युतमपि कुसुम माकाशा न्न प्रच्यव- त इति नित्य मेवा काश सम्बन्धो वर्तते ॥

यदिच – मल्लिकालता जन्यत्वा न्मल्लिका कुसुम मित्युच्यते, तदा ऽऽकाशस्यापि सर्वकार्ये ष्ववकाशप्रदत्वेन कारणत्वा दाकाश कुसुममिति व्यवहारो दुर्वारः ॥ अथा काशापेक्षया पुष्पस्य भिन्नत्वा न्नाकाश कुसुम- मिति व्यवहार इतिचेत् – भिन्नत्वं किं कथंचित्? सर्वथावा? आद्ये मल्लिका कुसुम मित्यपि व्यवहारो माभूत, मल्लिकापेक्षया कथञ्चि द्भि- न्नत्वा त्पुष्पस्य । अन्त्ये त्वाकाशापेक्षया पुष्पस्य सर्वथा भिन्नत्व मसि- द्धम् । द्रव्यत्वादिना कथंचि दभेदस्यापि सद्भावात् । तस्मा न्मल्लिकाकुसु- म माकाश कुसुम मित्यनयो र्नकोपि विशेषइति सिद्धान्तस्या स्तिनास्त्या- त्मकत्वम् ॥ " इत्याहुः ॥

अथ-अस्त्येवजीव इत्यत्रा स्तिशब्दवाच्या दर्था द्भिन्नस्वभावो जीव शा- ब्दवाच्योऽर्थस्स्यात ? अभिन्नस्वभावेवा ? यद्यभिन्नस्वभाव स्तदा जीवश- ब्दार्थो ऽस्तिशब्दार्थ श्चैकएवेति सामानाधिकरण्य विशेषणविशेष्यभा वादिकं नस्यात् । घटःकलश इत्यादि सामानाधिकरण्या द्यभाववत् । तदन्यतरपदाप्रयोगप्रसंगश्च । किंच-सत्त्वस्य सर्वद्रव्यपर्याय विषयत्वा त्तदभिन्नस्वभावस्यापि जीवस्य तथात्वं प्राप्तमिति सर्वस्य तत्वस्य जी- वत्वप्रसंगः । यदिपुन रस्तिशब्द वाच्या दर्था द्भिन्नएव जीवशब्द वा- च्योऽर्थः कल्प्यते, तदा जीवस्या सद्रूपत्वप्रसंगः । अस्तिशब्दवाच्या दर्था द्भिन्नत्वात् । प्रयोगश्च नास्ति जीवः, अस्तिशब्दवाच्यापेक्षया-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भिन्नत्वात् , शशविषाणवत् । अस्तित्वस्य जीवाद्भिन्नत्वव त्सक-लार्थेभ्योपि भिन्नत्वा न्निराश्रयत्वा दभावप्रसंगः । नच - जीवादिभ्यो-भिन्नम प्यस्तित्वं समवायेन जीवादिषु वर्ततइति वाच्यं, तस्यान्यत्र-निराकरणात । इतिचेत् , अत्रोच्यते । अस्तिशब्दवाच्य जीवशब्द-वाच्यार्थयो र्द्रव्यार्थादेशा दभिन्नत्वम् , तयोः पर्यायार्थादेशा द्भिन्नत्व-मि त्यनेकान्तवादिनां न कोपिदोषः , तथा प्रतीतेः । इत्यग्रे व्यक्ती भविष्यति ॥

इति प्रथमद्वि ीयभंग द्वयं निरूपितम् ।

अथ तृतीय भंगस्तु निरूप्यते ।

घट स्स्यादस्तिच नास्तिचेति तृतीयः । घटादिरूपैक धर्मिविशे ष्यक क्रमार्पित विधिप्रतिषेधप्रकारक बोधजनकवाक्यत्वं तल्लक्षणम् । क्रमार्पित स्वरूप पररूपाद्यपेक्षया ऽ स्तिनास्त्यात्मको घट इति निरूपित प्रायम् ।

सहार्पितस्वरूप पररूपादिविवक्षायां स्या दवाच्यो घट इति चतु-र्थः । घटादिविशेष्यका वक्तव्यत्वप्रकारक बोध जनकवाकयत्वम् तल्लक्षणम ।

ननु-कथ मवक्तव्यो घटः, इति चे दत्रब्रूमः । सर्वोपि शब्दः प्र-धानतया न सत्वासत्वे युगप त्प्रतिपादयति , तथा प्रतिपादने शब्द स्य शक्त्यभावात्, सर्वस्य पद स्यैक पदार्थविपयत्वसिद्धेः । अस्ती-तिपदंहि सत्ताद्वाचकं नासत्त्वं प्रतिपादयति , तथा नास्तीतिपद मस-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्ववाचकं न सत्तां बोधति । अस्त्यादिपदस्या स्तित्व नास्तित्वोभय धर्मवाचकत्वेच तदन्यतरपदाप्रयोगप्रसंगः ।

ननु - सर्वेषां पदाना मेकार्थत्वनियमे नानार्थकपदोच्छेदापत्तिः, इति चेन्न, - गवादिपदस्यापि स्वर्गा द्यनेकार्थविषयतया प्रसिद्धस्य तत्त्वतो ऽनेकत्वात्, सादृश्योपचारादेव तस्यैकत्वेन व्यवहरणात। अन्यथा - सकलार्थस्या प्येकशब्दवाच्यत्वापत्ते रर्थभेदेना नेकशब्दप्रयोग वैफल्यात् । यथैवहि समभिरूढनयापेक्षया शब्दभेदा द्ध्रुवोऽर्थ भेद स्तथाऽर्थभेदादपि शब्दभेद स्सिद्धएव । अन्यथा वाच्यवाचक नियम- व्यवहार विलोपात् ।

एतेन - एकस्य वाक्यस्य युगप दनेकार्थविषयत्वं प्रत्याख्यातम्, स्यादस्तिनास्त्येव घटः- स्वरूप पररूपादि चतुष्टयाभ्यामिति वाक्य- स्यापि क्रमार्पितोभय विषय धर्मतयो ररीकृतस्य उपचारादे- वैकत्वांगीकाराद ॥ अथवा - तत्र क्रमशो विवक्षितम् य दु- भयप्राधान्य मेकं, तदेवा स्तिनास्तिशब्दाभ्या मभिहितमिति तादृश वाक्य स्यैकार्थाभिधायित्वादेवै कवाक्यत्वमिति नदोषः । सर्वस्य वाक्य स्यैकक्रियाप्रधानतयै कार्थविषयत्वप्रसिद्धे रेकार्थबोधनशक्ति शब्दस्य सिद्धा । नहि शब्दानां वचनसामर्थ्यं सूचनसामर्थ्यंवा ऽतिक्रम्या र्थबोधने प्रवृत्ति स्सम्भवति । अस्तिशब्दस्यहि सत्त्वमात्र- वचने सामर्थ्यविशेषो ना सत्त्वा द्यनेकधर्म वचने । निपातानां वाच- कत्वपक्षे स्यादिति शब्दस्या नेकान्तसामान्यवचने सामर्थ्यविशेषो न पुन रेकान्तवचने, ना प्यनेकान्त विशेषवचने, तेषां द्योतकत्वपक्षे चा नेकान्तसूचने सामर्थ्यविशेषो नान्यत्रेति वचनसूचनसामर्थ्य मतिक्र- म्य शब्दप्रयोगो वृद्धव्यवहारेषु क्कापि न दृष्टचरइति ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ननु – यथासङ्केतं शब्दप्रवृत्तिदर्शना द्युगप त्सदसत्त्वयो स्सङ्केतित शब्द स्तद्वाचकोऽस्तु, शतृशानचो र्द्वयो स्संकेतित सनितिसंज्ञाशब्दवत्; युगप च्चन्द्रसूर्ययो स्संकेतितपुष्पवन्तादिपदवद्वा । इतिचेन्न ;– संकेतस्यापि वाच्यवाचकशक्त्यनुरोधेनैव प्रवृत्तेः । नहि वाच्यवाचकशक्त्यतिलंघनेन संकेतप्रवृत्ति र्दृष्टचरी । यथा – कर्तुरयसो दारुलेखने शक्ति र्नतथा वज्रलेखनेस्ति, यथावा वज्रलेखने तस्या शक्ति र्नतथा दारुलेखने, यथाच दारुणः कर्मणोऽयसा लेख्यत्वे शक्ति र्न तथा वज्रस्यास्ति, यथावा वज्रस्य तत्राशक्ति र्नतथा दारुणोपीति, निश्चयः । एवं शब्दस्यापि सकृ देकस्मि न्नेवार्थे प्रतिपादनशक्ति रनेकस्मि न्नर्थेपुनः प्रतिपादना शक्तिः, तथा – एकस्यैवा र्थस्यै कपदवाच्यताशक्ति र्नपुन रनेकस्यापीति निश्चयः । पुष्पवन्तादिशब्दानामपि क्रमेणा र्थद्वयप्रतिपादन एव सामर्थ्य मिति न दोषः ॥

ननु – सेना वन युद्ध पंक्ति माला पानक ग्राम नगरादि शब्दाना मनेकार्थप्रतिपादकत्वं दृष्ट मिति चेन्न ;– करि तुरग रथ पदाति समूहस्यैवै कस्य सेनाशब्देनाभिधानात, वृक्षसमूहस्य वनशब्देन, पुष्पसमूहस्य मालाशब्देन, गुडादिद्रव्यसमूहस्य पानकशब्देन, प्रासादादिसमूहस्य नगरशब्देन, चाभिधाना, न्नै कशब्देना नेकार्थ प्रतिपादनं दृश्यते ।

नन्वेवं – वृक्षावितिपदं वृक्षद्वयबोधकं वृक्षाइतिच बहुवृक्षबोधकं कथ मुपपद्यतइति चेत ? पाणिन्यादीना मेकशेषारम्भा ज्जैनेन्द्राणा मभिधानस्य स्वाभाविकत्वा दिति ब्रूमहे । तत्रैकशेषपक्षे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्वाभ्यामेव वृक्षशब्दाभ्यां वृक्षद्वयस्य बहुभिरेव वृक्षशब्दै र्बहूनां वृक्षाणा मभिधाना न्नैकशब्दस्य सकृ दनेकार्थ बोधकत्वम् । लुप्ता-वशिष्टशब्दयो स्साम्या द्वृक्षरूपार्थस्य समानत्वा च्चैकत्वो पचारात्त न्नेकशब्द प्रयोगोपपत्तिः । अभिधानस्य स्वाभाविकत्वपक्षेच वृक्ष-शब्दो द्विबहुवचनान्त स्स्वभावत एव द्वित्वबहुत्व विशिष्टं वृक्षरू पार्थ मभिदधाति । वृक्षावित्यत्रहि वृक्षत्वावच्छिन्नो वृक्षशब्दार्थः, द्वित्वंच द्विवचनार्थः, प्रत्ययार्थस्य प्रकृत्यर्थेऽन्वयात् द्वित्वविशिष्टौ वृक्षाविति बोधः। वृक्षाइत्यत्रच बहुवचनार्थो बहुत्वमिति बहुत्वविशिष्टा वृक्षा इति बोधः ।

यद्यपि द्वितीयपक्ष एकस्यैव वृक्षपदस्या नेक वृक्षबोधकत्वं प्रा-प्तम् । तथा प्यनेकधर्मावच्छिन्नार्थबोधकत्व मेकपदस्य नास्तीति-नियमः । एवंच वृक्षा इति बहुवचनान्तेनापि वृक्षपदेन वृक्षरूपैक धर्मावच्छिन्नस्यैव बोधो नान्यधर्मावच्छिन्नस्य । तथाचा स्त्यादि पदेना प्यस्तित्वादि रूपै कधर्मावच्छिन्नस्य बोध स्सम्भवति , नतु-नास्तित्वादि धर्मान्तरावच्छिन्नस्येति ॥

ननु - वृक्षा इति प्रत्ययवर्ता प्रकृतिः पदम् , " सु-तिङन्तं पदम् " इति वचनात् । तथाच - वृक्षाइति बहुवचना-न्तेन बहुत्व वृक्षत्वरूपानेक धर्मावच्छिन्नस्य बोधा देकपदस्या नेक धर्मा वच्छिन्नबोधकत्वं नास्तीति नियमस्य भंगप्रसंगः ।

तदुक्तम्-

" अनेकमेकंच पदस्य वाच्यं वृक्षा इति प्रत्ययव त्प्रकृत्या । "

इति ।

इतिचेत्सत्यम्,-एकपदस्य प्रधानतयाऽनेकधर्मावच्छिन्न बोधकत्वं-नास्तीति नियमस्यो क्तत्वात् । प्रकृतेच प्रथमतो वृक्षशब्दो वृक्षत्वरूप-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जातित्यवच्छिन्नं द्रव्यं बोधयति । ततो लिंगं संख्यां चेति शाब्दबोधः क्रमेणैव जायते ।

तदुक्तम् -

" स्वार्थ मभिधायशब्दो निरपेक्षो द्रव्य माह समवेतम् ।
समवेतस्यतुवचने लिंगंसंख्यां विभक्तियुक्तस्सन् ।"

इति ।

एवंच प्रधानभावेन वृक्षत्वावच्छिन्नस्य प्रतीति र्गुणभावेन बहुत्व-संख्याया इति न कश्चिद्दोषः ।

अथैकस्य पदस्य वाक्यस्यवा प्रधानभावेना नेक धर्मावच्छिन्न वस्तु बोधकत्वा नंगीकारे प्रधानभावेना शेषधर्मात्मकस्य वस्तुनः प्रकाशकं प्रमाणवाक्यं कथ मुपपद्यते? इतिचेत्-कालादिभि रभेदवृत्त्या ऽभेदोपचारेणवा द्रव्यपर्यायनयार्पितेन सकलस्य वस्तुनः कथनात् । इति निरूपितं प्राक् ।

ननु ' सत्त्वासत्त्वे ' इतिद्वन्द्वसमासपदं सत्त्वासत्त्वयोः प्राधान्येन बोधकम् । " उभयपदार्थप्रधानोद्वन्द्वः " इतिवचनात् ; एवंच कथ मवाच्यत्वं सदसत्त्वात्मकवस्तुनः ? इतिचेन्न - द्वन्द्वस्यापि क्रमेणैवा र्थद्वयप्रत्यायन समर्थत्वेन गुणप्रधानभावस्य तत्रापि सत्त्वात् । अतएव - " अभ्यर्हितं पूर्वम् " इतिप्रधानभूतार्थस्य पूर्वनिपातानुशासनं संगच्छते । अस्तुवा - द्वन्द्व उभयस्यापि प्राधान्येनबोधः । अथापि प्रधानभावेना स्तित्व नास्तित्वोभयावच्छिन्नस्य धर्मिणः प्रतिपादक शब्दाभावा दवाच्यत्व मक्षतम् ।

नच - ' सदसत्त्वविशिष्टं वस्तु ' इत्यनेन द्वंद्वगर्भित तत्पुरुषेण सदसत्त्वविशिष्टपदेन तदुभयधर्मावच्छिन्नस्य वस्तुनो बोधसम्भवा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दिति वाच्यं, तत्र सदसत्त्ववैशिष्ट्यस्यैव प्रधानतया तयो रप्रधानत्वात् । " उत्तरपदार्थप्रधान स्तत्पुरुषः " इति वचनात् । तस्मा त्सकलवाचक रहितत्वा त्स्या दवक्तव्यो घटइति सिद्धम् ॥

तच्च न सर्वथैवा वक्तव्यं, अवक्तव्यशब्देना स्य वक्तव्यत्वात् । अत स्स्यादवक्तव्यो घट इति चतुर्थ भंगः । इति केचि द्व्याचक्षते । तत्रेदं चिन्त्यं, अवक्तव्यशब्दस्या भिधेयं किमिति ।

नच - प्रधानभूत सदसत्त्वरूपधर्मावच्छिन्नं वस्तु अवक्तव्यशब्देना भिधीयत इति वाच्यम्; तथा सति तस्य सकलवाचकराहितत्वक्षतेः, अवक्तव्यशब्दस्य तद्वाचकस्य सत्त्वात्, एकपदस्य प्रधानभुता नेकधर्मावच्छिन्न वस्तुबोधकत्वं नास्तीति नियमस्य भंगप्रसंगाच्च ।

किञ्च - यथा ऽ वक्तव्यमिति पदं सांकेतिकं तादृशोभयधर्मावच्छिन्नस्य वाचकं, तथा सांकेतिक मन्यदपि तद्वाचकं कुतो नभवति ?

ननु - अन्यस्य सांकेतिकपदस्य क्रमेणै तादृशधर्मावच्छिन्नवस्तुबोधकत्वमितिचेत्; अवक्तव्यपदस्यापि युगप त्तद्वाचकत्वं माभूत् । यथा - सांकेतिकपदान्तरेण सत्त्वासत्त्वादिधर्मावच्छिन्नं वस्तु क्रमेण प्रतीयते, तथा ऽ वक्तव्यपदेनापि, उभयो र्विशेषाभावात् । अवक्तव्यपदेनहि वक्तव्यत्वाभावरूपधर्मावच्छिन्नं वस्तु प्रतीयते, नतु सत्त्वासत्त्वादिरूपानेकधर्मावच्छिन्नं वस्त्विति सर्वानुभवसाक्षिक मेतत् ।

अथैवम् -

" उक्तिश्चा वाच्यतैकान्ते ना वाच्यमिति युज्यते । "

इति स्वामिसमन्तभद्राचार्यवचनं कथं संघटते ? सत्त्वासत्त्वविशिष्टस्य वस्तुन स्सर्वथा ऽ वाच्यत्वे तस्या वाच्यशब्देनापि वा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

च्यत्वं नस्यादिति तत्र प्रतिपादनात्, इति चेन्न ; तदर्थापरिज्ञाना-त । अयंखलु तदर्थः, सत्त्वाद्येकैकधर्ममुखेन वाच्यमेव वस्तु-युगप त्प्रधानभूत सत्त्वासत्त्वोभयधर्मावच्छिन्नत्वेना वाच्यम्, तादृश वस्तुनः सत्त्वाद्येकधर्ममुखेनाप्य वाच्यत्वे वाच्यत्वाभावधर्ममुखेना वा-च्यशब्देनापि वाच्यत्वं नस्या दिति । एतादृशव्याख्या मपहाय स-त्वासत्त्वोभयरूपेणा वाच्यं वस्तु तादृशरूपेणैवा वाच्यशब्देन वाच्यं भवतीति व्याख्याने येन रूपेणा वाच्यम् वस्तु - तेनैव रूपेण वा-च्यम् प्राप्तमिति येन रूपेण सत्त्वं तेनैव रूपेणा सत्त्व मप्यंगी-क्रियताम् । तथाच -

" विरोधा न्नोभयैकात्म्यं स्या द्वादन्यायवेदिनाम् । "

इति तदीयवचनमेव विरुद्ध्यते ।

सिद्धान्तविदस्तु - अवक्तव्यएव घट इत्युक्ते सर्वथा घटस्या वक्तव्यत्वं स्यात्, तथाचा स्तित्वादिधर्ममुखेनापि घटस्य प्रथमादि-भंगै रभिधानं नस्यात्, अतः स्यादिति निपातप्रयोगः । तथाच सत्त्वादिरूपेण वक्तव्यएव घटो युगप त्प्रधानभूत सत्त्वासत्त्वोभय रूपेणा वक्तव्यइति चतुर्थभंगार्थ निष्कर्ष इति प्राहुः ॥

व्यस्तसमस्तद्रव्यपर्याया वाश्रित्य चरमभंगत्रय मुपपादनीयम् । तथाहि - व्यस्तं द्रव्यं समस्तौ सहार्पितौ द्रव्यपर्याया वाश्रित्य स्या दस्ति चावक्तव्यएव घट इति पंचमभंगः । घटादिरूपैक धर्मिविशेष्यक सत्त्वविशिष्टावक्तत्वप्रकारक बोधजनकवाक्यत्वं तल्लक्षणम् । तत्र द्रव्या-र्पणा दस्तित्वस्य युगप द्द्रव्यपर्यायार्पणा दवक्तव्यत्वस्यच विवक्षितत्वात् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तथा व्यस्तं पर्यायं समस्तौ द्रव्यपर्यायौ चाश्रित्य स्या न्नास्ति चावक्तव्यएव घट इति षष्ठः । तल्लक्षणंच घटादिरूपैक धर्मिविशेष्यक नास्तित्वविशिष्टा वक्तव्यत्व प्रकारक बोधजनक वाक्यत्वम् ।

एवम् व्यस्तौ क्रमार्पितौ समस्तौ सहार्पितौच द्रव्यपर्याया वाश्रित्य स्या दस्ति नास्ति चावक्तव्यएव घट इति सप्तमभंगः । घटादिरूपैकवस्तुविशेष्यक सत्त्वासत्त्वविशिष्टावक्तव्यत्व प्रकारक बोधजनक वाक्यत्वं तल्लक्षणम् । इति संक्षेपः ॥

अत्र - द्रव्यमेव तत्त्वं , अतस्स्यादस्तीति भंग एकएवेति सांख्य मत मयुक्तम् ; - पर्यायस्यापि प्रतीतिसिद्धत्वात । तथा - पर्यायएव तत्त्वं, अत स्स्या न्नास्तीति भंगएवेति सौगतमतमपि युक्तिदुर्गतम् ; द्रव्यस्यापि प्रतीतिसिद्धत्वात । एव मवक्तव्यमेव वस्तुतत्वमि त्यव क्तव्यत्वैकान्तोपि स्ववचनपराहतः , सदा मौनव्रतिकोह मितिवत । एवमेवा न्येषा मेकान्तानां प्रतीतिपराहतत्वा दनेकान्तवादएवा वतिष्ठते ।

ननुच - अनेकान्तेपि विधिप्रतिषेधरूपा सप्तभंगी प्रवर्ततेवा नवा ? यदि प्रवर्तते - तदाऽ नेकान्तस्य निषेधकल्पनाया मेकान्तएव प्राप्तइति तत्पक्षोक्त दोषानुषंगः । अनवस्थाच । तादृशैकान्तस्या प्य परानेकान्तकल्पनया विधिप्रतिषेधयो र्वक्तव्यत्वात । यदि सा न प्रवर्तते- तदा सर्वं वस्तुजातं सप्तभंगी संवलित मिति सिद्धान्तव्या घातः । इति चन्न , - प्रमाणनयार्पणाभेदा त्तत्रापि तदुपपत्तेः । तथाहि - एकान्तो द्विविधः - सम्य गेकान्तो मिथ्यैकान्त इति । अनेकान्तोपि द्विविधः , सम्य गनेकान्तो मिथ्यानेकान्त इति । तत्र

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सम्य गेकान्त स्ताव त्प्रमाणविषयीभूता नेक धर्मात्मक वस्तुनिष्ठै कध- भंगोचरो धर्मान्तराप्रतिषेधकः । मिथ्यैकान्त स्त्वेकधर्ममात्रावधार णेना न्याशेषधर्मनिराकरणप्रवणः । एव मेकत्र वस्तु न्यस्तित्व नास्तित्वादि नानाधर्मनिरूपणप्रवणः प्रत्यक्षानुमानागमाविरुद्ध स्स- म्य गनेकान्तः । प्रत्यक्षादिविरुद्धा नेक धर्मपरिकल्पनं मिथ्यानें- कान्तः । इति । तत्र सम्यगेकान्तो नयः, मिथ्यैकान्तो नया भासः । सम्य गनेकान्तः प्रमाणं ; मिथ्यानेकान्तः प्रमाणाभा सः । इति व्यपदिश्यते ।

तथाच- सम्यगेकान्त सम्यगनेकान्ता वाश्रित्य प्रमाण नयार्पणा- भेदात , स्यादेकान्तः, स्यादनेकान्तः, स्यादुभयः, स्यादवक्तव्यः, स्या देकान्तश्चावक्तव्यश्च, स्यादनेकान्तश्चावक्तव्यश्च, स्यादेकान्तोनेकान्तश्चा वक्तव्य श्चेति सप्तभंगी योज्या । तत्र नयार्पणा देकान्तो भवति , एक- धर्मगोचरत्वा न्नयस्य । प्रमाणा दनेकान्तोभवति , अशेषधर्मनिश्चया- त्मकत्वा त्प्रमाणस्य । य द्यनेकान्तो ऽनेकान्तएव न त्वेकान्तइतिमतम् । तदा - एकान्ताभावे तत्समूहात्मकस्या नेकान्तस्या प्यभाव प्रसंगः, शा- खाद्यभावे वृक्षाद्यभाववत । इत्येवं मूलभंगद्वयेसिद्धे उत्तरेच भंगा- एवमेव योजयितव्याः ॥

इयंच सप्तभंगी नित्यत्वा नित्यत्वैकत्वानेकत्वादि धर्मेष्वपि नि- रूपयितव्या । यथा स्यान्नित्योघटः, स्यादनित्योघट इतिमूलभंगद्व यं , घटस्य द्रव्यरूपेण नित्यत्वा त्पर्यायरूपेणा नित्यत्वात ।

तदुक्तम् ।

" समुदेति विलयमृच्छति भावोनियमेन पर्ययनयेन ।
नोदेति नोविनश्यति द्रव्यनयालिङ्गितोनित्यम् ॥ " इति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ननु- स्यान्नित्योघटइत्यत्र स्याच्छब्दः कथञ्चिदर्थकः, अवच्छिन्नत्वं संसर्गः, द्रव्यरूपावच्छिन्न नित्यत्ववान् घट इतिबोधश्च प्रथमवाक्यस्य युक्तः । द्वितीयवाक्येचा नित्यपदस्य नित्यभेदोऽर्थः, एवंच पर्यायरूपावच्छिन्न नित्यभेदवान् घटइति बोधः प्राप्नोति । सचायुक्तः । द्रव्यरूपेण नित्ये घटे नित्यभेदस्य बाधितत्वात्; भेदस्य व्याप्यवृत्तित्वात् । इति चेदुच्यते;- मूले वृक्ष स्संयोगीनेत्यबाधितप्रतीत्या भेदस्या प्यव्याप्यवृत्तित्व मंगीक्रियत एव । अव्याप्यवृत्तित्वंच प्रकृते प्रतियोगिवृत्तित्वम् । संयोगिभेदस्य प्रतियोगी संयोगवान् वृक्षः, तद्वृत्तित्वं संयोगिभेदस्या क्षतम्; वृक्षे मूलावच्छेदेन संयोगिभेदस्य सत्त्वात् । तथाच घटेऽपि पर्यायावच्छेदेन नित्यभेदो वर्तत इति पर्यायरूपावच्छिन्न नित्यभेदवान् घट इति बोधे न कापि क्षतिरिति बोध्यम् ।

एकत्वानेकत्व सप्तभंगी यथा - स्या देको घटः, स्या दनेको घटइति मूलभंगद्वयम् । द्रव्यरूपेणैको घटः, स्थासकोशकुसूलादिषु मृद्द्रव्यस्यैकस्या नुगतत्वात्, तस्योर्ध्वता सामान्यरूपत्वात् । पर्यायरूपेणा नेको घटः, रूपरसाद्यनेकपर्यायात्मकत्वात् घटस्य ।

नन्वेवमपि सर्वं वस्तु स्या देकं स्या दनेकमिति कथं संगच्छते? सर्वस्य वस्तुनः केनापि रूपेणै क्याभावात् । नच - सत्त्वादिरूपेण सर्वस्यैक्यं सम्भवतीति वाच्यम्; सत्त्वस्यापि सकलवस्तुव्यापिन एकस्य सिद्धान्त विरुद्धत्वात् । सदृशपरिणामस्यैकैकव्यक्तिगतस्य ततद्व्यक्त्या त्मकस्य प्रतिव्यक्ति भिन्नस्यैव सिद्धान्त सिद्धत्वात । तदुक्तम् - " उपयोगोलक्षणम् " इति सूत्रे तत्वार्थश्लोकवार्तिके -

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

" नहि वयं सदृशपरिणाम मनेकव्यक्तिव्यापिनं युगप दुपगच्छामो ऽन्यत्रोपचारात् " इति ।

सूचितंच माणिक्यनन्दिस्वामिभिः –

" सदृशपरिणाम स्तिर्यक् खण्डमुण्डादिषु गोत्ववत् " इति ।

विवृतंचैत न्मार्तण्डे –

" सदृशपरिणामात्मक मनेकं तिर्य क्सामान्यं " इति ।

तस्मा त्सत्त्वस्यापि तिर्यक्सामान्यरूपस्य प्रतिव्यक्ति भिन्नत्वात् कथं सर्वस्य वस्तुन स्सत्त्वेन रूपे णैक्यम् ? इतिचेत् ;- अत्रब्रूमः । सत्तासामान्य मेका नेकात्मकमेव सिद्धान्ते स्वीकृतम् । सत्त्वंहि व्यक्त्यात्मनाऽनेकमपि स्वात्मनैकंभवति । पूर्वोदाहृतपूर्वाचार्य वचनानां च सर्वथैक्य निराकरणपरत्वात् । अन्यथा सत्तासामान्यस्य सर्वथा नेकत्वे पृथक्त्वैकान्तपक्षएवा हतस्स्यात । तथाच " पृथक्त्वैकान्त पक्षेपि " इत्यादि स्वामिसमन्तभद्राचार्यवचनं तद्व्याख्यानभूत मकलंकादिवचनंच विरुद्ध्यते । अनेक व्यक्त्यनुगतस्यै क धर्मस्यानगीकारे सादृश्यमेव दुर्वचनम् , यत स्तद्भिन्नत्वेसति तद्गत भूयो धर्मवत्वम् सादृश्यम् । यथा – चन्द्रभिन्नत्वेसति चन्द्रगताह्लादकरत्वादि मुखे चन्द्रसादृश्यम् , एवं घटयोरपि परस्परसाधर्म्यं घटत्वरूपैक– धर्म मादायैवोपपद्यते । अन्यथा साधारणधर्मा साधारणधर्म व्यवस्थैव न घटते । अनेकव्यक्ति वृत्तित्वमेव हि साधारणत्वम् । तस्मा त्सत्त्वादिना सर्वस्यैक्यम् जीवादिद्रव्यभेदेना नेकत्वम् चोपपन्नम् ।

तदिदमाहुः स्वामिसमन्तभद्राचार्याः–

" सत्सामान्यात्तु सर्वैक्यं पृथग्द्रव्यादिभेदतः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भेदाभेद विवक्षाया मसाधारणहेतुवत् ॥ " इति ।

यथा-हेतुः पक्षधर्मत्वादिभेद विवक्षाया मनेकः, हेतुत्वेनैकश्च । तथा सर्वं सत्त्वादिभि रेकं जीवद्रव्यादिभेदेना नेकमिति तदर्थः । प्र पंचित श्चाय मर्थो देवागमालंकार इति नेहो च्यते ।

अत्रा प्यनेक पदस्यैक भिन्नार्थकतया एकस्मिन् घटाद्या वेकभेदः कथं वर्तत इतिचोद्ये, पर्यायावच्छेदेन वर्तते- यथा वृक्षे मूलावच्छेदेन संयोगिभेद इतिः, पूर्वव त्परिहारो बोध्यः ।

एवं अयं स्याज्जीवः स्यादजीव इति मूलभंगद्वयम् । तत्रोपयोगात्मनाजीवः, प्रमेयत्वाद्यात्मना ऽजीव इति तदर्थः ।

तदुक्तं भट्टाकळंकदेवैः -

" प्रमेयत्वादिभि र्धर्मै रचिदात्मा चिदात्मकः ।

ज्ञानदर्शनत स्तस्मा च्चेतनाऽचेतनात्मकः ॥ " इति ।

अजीवत्वंच प्रकृते ऽजीववृत्तिप्रमेयत्वादि धर्मवत्वम् , जीवत्वंच ज्ञानदर्शनादिमत्त्व मिति द्रष्टव्यम् ।

नन्वय मनेकान्तवाद श्छलमात्रमेव , तदेवास्ति तदेव नास्ति, तदेव नित्यं तदेवानित्यमिति प्ररूपणारूपत्वा दनेकान्त वादस्य । इति चेन्न ; -- छललक्षणाभावात । अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्या र्थान्तरं परिकल्प्य दूषणाभिधानं छलमिति छलसामान्य लक्षणम् ! यथा नवकम्बळोयं देवदत्तइति वाक्यस्य नूतनाभिप्रायेण प्रयुक्तस्या र्थान्तर माशंक्य कश्चिद्दूषयति , नास्य नवकम्बळा स्सन्ति दरिद्रत्वात ; नह्यस्य द्विकम्बळवत्वमपि सम्भाव्यते ; कु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तो नवेति । प्रकृतेचा नेकान्तवादे तादृश छललक्षणस्य प्रसक्तिरेव नास्ति, अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्या र्थान्तर परिकल्पनाभावात ॥

अथ संशयहेतु रनेकान्तवादः , एकस्मि न्वस्तुनि विरुद्धाना मास्तित्व नास्तित्वादि धर्माणा मसम्भवात ; एकवस्तुविशेष्यक- विरुद्ध नानाधर्मप्रकारक ज्ञानंहि संशयः । यथा - स्थाणुर्वा नवे त्याकारकज्ञानं एकधर्मिविशेष्यक स्थाणुत्व तदभावप्रकारक ज्ञान- त्वात्संशयः । तथाचा स्तित्व नास्तित्वादिरूप विरुद्ध नानाधर्मप्रकार क घटादिरूपैक वस्तुविशेष्यक ज्ञानजनकत्वा त्संशयहेतु रनेकान्त वादः । इतिचेन्न ; -- विशेषलक्षणोपलब्धेः । संशयोहि सा मान्यप्रत्यक्षा द्विशेषाप्रत्यक्षा द्विशेषस्मृतेश्च जायते । यथा स्थाणुपुरुषोचिते देशे नातिप्रकाशा न्धकारकलुषायां वेळाया मूर्ध्व मात्रं - सामान्यं पश्यतः , वक्र कोटर पक्षिनीडादीन् स्थाणु गता न्विशेषा न्वस्त्र संयमन शिरः कण्डूयन शिखा बन्ध- नादीन्पुरुषगतां श्चानुपलभमानस्य तेषां च स्मरतः पुरुष स्यायं स्था णुर्वा पुरुषोवेति संशय उपपद्यते । अनेकान्तवादे च विशेषोपल- ब्धि रप्रतिहतैव , स्वरूप पररूपादि विशेषाणां प्रत्यर्थ मुपलम्भात । तस्मा द्विशेषोपलब्धे रनेकान्तवादो न संशयहेतुः ।

अथैवमपि संशयोदुर्वारः , तथाहि - घटादावस्तित्वादि धर्माणां साधकाः प्रतिनियता हेतव स्सन्तिवा नवा ? नचे द्विप्रतिपन्नं प्रति प्रतिपादनासम्भवः । सन्तिचे देकत्र वस्तुनि परस्परविरुद्धास्ति त्व नास्तित्वादिसाधक हेतुसद्भावा त्संशयो दुर्वारः । इतिचेन्न; अस्तित्वनास्तित्वयो रवच्छेदकभेदेना र्प्यमाणयो र्विरोधाभावात । यथा - एकस्यैव देवदत्तस्यै कापेक्षया पितृत्व मन्यापेक्षया पुत्रत्वंच

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

परस्परमविरुद्धम् । यथान्वयव्यतिरेकि धूमादिहेतौ सपक्षे महानसादौ सत्त्वं विपक्षे महाह्रदादावसत्त्वंच परस्परमविरुद्धम् । तथास्तित्वनास्तित्वयोरपि । तयोर्विरोधश्चानुपदमेव स्पष्टं परिहरिष्यते ॥

ननु - अनेकान्तवादे विरोधादयोऽष्टदोषास्सम्भवन्ति । तथाहि - एकत्रार्थे विधिप्रतिषेधरूपावस्तित्वनास्तित्वधर्मौ नसम्भवतः, शीतोष्णयोरिव भावाभावयोः परस्परं विरोधात् । अस्तित्वंहि भावरूपं, विधिमुखप्रत्ययविषयत्वात् । नास्तित्वंच प्रतिषेधरूपं, नञुल्लिखितप्रतीतिविषयत्वात् । यत्रास्तित्वं तत्र नास्तित्वस्य विरोधः, यत्रच नास्तित्वं तत्रास्तित्वस्य विरोधः, इति विरोधः ॥ अस्तित्वस्याधिकरणमन्यन्नास्तित्वस्याधिकरणमन्यदित्यस्तित्वनास्तित्वयोर्वैयधिकरण्यम् । तच्च विभिन्नाधिकरणवृत्तित्वम् ॥ येन रूपेणास्तित्वं येनच रूपेण नास्तित्वं तादृशरूपयोरपि प्रत्येकमस्तित्वनास्तित्वात्मकत्वं वक्तव्यम्, तच्च स्वरूपपररूपाभ्यां, तयोरपि प्रत्येकमस्तित्वनास्तित्वात्मकत्वं स्वरूपपररूपाभ्यामित्यनवस्था । अप्रामाणिकपदार्थपरम्परापरिकल्पना विश्रान्त्यभावश्चानवस्थेत्युच्यते ॥ येन रूपेण सत्त्वं तेन रूपेणासत्त्वस्यापि प्रसंगः, येन रूपेण चासत्त्वं तेन रूपेण सत्त्वस्यापि प्रसंगः, इति संकरः । "सर्वेषां युगपत्प्राप्तिस्संकरः ।" इत्यभिधानात् ॥ येन रूपेण-सत्त्वं तेनरूपेणासत्त्वमेव स्यान्नतु सत्त्वं, येन रूपेणचासत्त्वं तेन सत्त्वमेव स्यान्नत्वसत्त्वं, इति व्यतिकरः । "परस्परविषयगमनं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्यतिकरः" इति वचनात ॥ सत्त्वासत्त्वात्मकत्वेच वस्तुन इद-मित्थमेवेति निश्चेतु मशक्ते स्संशयः ॥ ततश्चानिश्चयरूपा ऽप्रतिपत्तिः ॥ तत स्सत्त्वासत्त्वात्मनो वस्तुनो ऽभावः ॥ इति ॥

अत्र वदन्त्यभिज्ञाः। कथंचि त्प्रतीयमाने स्वरूपाद्यपेक्षया वि वक्षितयो स्सत्त्वासत्त्वयोः प्रतीयमानयो र्न विरोधः। अनुपल-म्भसाध्योहि विरोधः। नहि स्वरूपादिना वस्तुन स्सत्त्वे तदैव पररूपादिभि रसत्वस्या नुपलम्भोऽस्ति। स्वरूपादिभि स्सत्त्वस्येव पररूपादिभि रसत्त्वस्यापि प्रतीतिसिद्धत्वात।

न खलु वस्तुन स्सर्वथा भावएव स्वरूपं, स्वरूपेणेव पर रूपेणापि भावप्रसंगात्। नाप्यभावएव, पररूपेणेव स्वरूपेणा प्यभावप्रसंगात्।

ननु - पररूपेणासत्वं नाम पररूपासत्त्वमेव। नहि घटे-पटस्वरूपाभावे घटो नास्तीति वक्तुं शक्यम्। भूतले घटाभावे भूतले घटो नास्तीति वाक्यप्रवृत्तिवत् घटे पटस्वरूपाभावे पटो नास्तीत्येव वक्तुमुचितत्वात। इति चेन्न; - विचारासहत्वात। घटादिषु पररूपासत्वं पटादिधर्मो घटधर्मोवा? नाद्यः, व्याघा तात्। नहि पटरूपासत्त्वं पटेऽस्ति। पटस्य शून्यत्वापत्तेः। नच स्वधर्मः स्वस्मिन्नास्तीति वाच्यम्, तस्य स्वधर्मत्व विरोधात्। पटधर्मस्य घटाद्याधारकत्वायोगाच्च। अन्यथा वितानावितानाकारस्यापि तदाधारकत्व प्रसंगात। अन्त्यपक्षस्वीकारेतु विवादो विश्रान्तः, भावधर्मयोगा द्भावात्मकत्ववद भावधर्मयोगा दभावा त्मकत्वस्यापि स्वीकरणीयत्वात, एवंच घटो नास्तीति प्रयोग

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उपपन्नः । अन्यथा यथैवा भावधर्मयोगे प्यस न्नस्या त्तथैव भावधर्म योगेपि सन्नस्यात् ।

ननु -- घटे पटरूपासत्वं नाम घट निष्ठाभाव प्रतियोगित्वम् । तच्च पट धर्मः । यथा भूतले घटो नास्ती त्यत्र भूतलनिष्ठाभाव प्रतियोगित्वमेव भूतले नास्तित्वं, तच्च घटधर्मः । इतिचेन्न; - तथापि पररूपाभावस्य घटधर्मत्वाविरोधात, घटाभावस्य भूतल धर्मत्ववत् । तथाच घटस्य भावाभावात्मकत्वं सिद्धम् । कथंचि त्तादात्म्य लक्षणसम्बन्धेन सम्बन्धिन एव स्वधर्मत्वात् ।

नन्वेवंरीत्या घटस्य भावाभावात्मकत्वे सिद्धेपि घटोस्ति पटो नास्तीत्येव वक्तव्यम् । पटाभाव प्रतिपादनपर वाक्यस्य तथा प्रवृत्तेः । यथा भूतले घटोनास्तीति घटाभावप्रतिपादन परं वाक्यम् प्रवर्तते - नतु भूतलं नास्तीति , तथा प्रकृते पटाभावस्य घटात्मकत्वेपि पटोनास्तीत्येव प्रयोगो युक्तः । अभावबोधकवाक्यस्य प्रतियोगिप्रधानत्वात् । यथा घटप्रागभावस्य कपालात्मकत्वेपि कपालदशायां घटोभविष्यतीत्येव प्रागभाव प्रतिपादकः प्रयोगो दृष्टः, नतु कपालोभविष्यतीति । यथा च घटध्वंसस्यो त्तर कपालात्मकत्वेपि घटोनष्टइत्येव प्रयोगः, तथा प्रकृतेपि । इतिचेदुच्यते ; - घटस्य भावाभावात्मकत्वे सिद्धे ऽस्माकं विवादो विश्रान्तः, समीहि तसिद्धेः ! शब्दप्रयोगस्तु पूर्वपूर्वप्रयोगानुसारेण भविष्यति । नहि पदार्थ सत्ताधीन श्शब्दप्रयोगः । तथाहि - देवदत्तः पचतीति प्रयोगोवर्तते । तत्र देवदत्तपदार्थ श्शरीरंवा ? आत्मावा ? शरीर विशिष्टात्मावा ? आद्ये देवदत्तस्थ शरीरं पचतीति प्रयोगापत्तिः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

द्वितीये देवदत्तस्यात्मा पचतीति प्रयोगापत्तिः । शरीरविशिष्टात्मा-पचतीति प्रयोगाभावा त्तृतीयपक्षेऽपि नोपपत्तिः । तथाच प्रतिपादित-प्रयोगाभावे पूर्वपूर्वप्रयोगाभाव एव शरणम् । तथाच पूर्वपूर्व प्रयोगानुगुण्येन प्रयोगप्रवृत्ते श्शब्दप्रयोगस्य पर्यनुयोगानर्हत्वात ।

किञ्च-घटादौ वर्तमानः पररूपाभावो घटा द्भिन्नोऽभिन्नोवा? यदि भिन्न स्तस्यापि परत्वा त्तदभाव स्तत्र कल्पनीयः । अ-न्यथा तस्य परत्वानुपपत्त्या घटादेः कथंचि दसद्रूपत्वासिद्धेः । तदभावकल्पनायां चानवस्था , तस्यापि परत्वात् । घटादिषु पररूपस्या तानवितानाकारस्या भावाभावपरिकल्पनायां तेषां वट-त्वापत्तिश्च, निषेधद्वयेन प्रकृतरूपसिद्धेः । यद्यभिन्न स्तर्हि सिद्धं स्वस्मा दभिन्नेन भावधर्मेण घटादौ सत्त्वव दभावधर्मेण तादृशेना सत्त्वमपि स्वीकरणीयमिति ।

ननु – स्वरूपेण भावएव पररूपेणाभावः , पररूपेणा भावएवच स्वरूपेण भावइति भावाभावयो रेकत्र वस्तुनि भेदाभावा द्वस्तुनः कुत स्तदुभयात्मकता , इतिचेत ; भावाभावापेक्षणीयस्य निमित्तस्य भेदा-दिति ब्रूमः । स्वद्रव्यादिकंहि निमित्त मपेक्ष्य भावप्रत्ययं जनय-त्यर्थः , परद्रव्यादिकंचा भावप्रत्ययं , इत्येकत्वद्वित्वादि संख्या-व देकवस्तुनि भावाभावयो र्भेदः । नह्येकत्र द्रव्ये द्रव्यान्तर मपे-क्ष्य द्वित्वादिसंख्या प्रकाशमाना स्वात्ममात्रापेक्ष्यैकत्वसंख्यातो न्या न प्रतीयते । नाप्येकत्व द्वित्वरूपोभयसंख्या तद्वतो भिन्नैव, द्रव्य स्या संख्येयत्वप्रसंगात् । संख्यासमवाया द्रव्यस्य संख्येयत्व मि-तितु न , कथंचि त्तादात्म्यव्यतिरेकेण समवायासम्भवात । तस्मा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्सिद्धोऽपेक्षणीयभेदा त्सत्वाव त्सत्वासत्वयो र्भेदः। भिन्नयो श्चानयो रेकवस्तुनि प्रतीयमानत्वा त्को विरोधः ।

ननु – सत्वासत्वयो रेकवस्तुनि प्रतीति र्मिथ्येति चेन्न; बाधकाभावात् । विरोधो बाधकइति चेन्न; परस्पराश्रयापत्तेः, सतिहि विरोधे प्रतीते स्तेन बाध्यमानत्वा न्मिथ्यात्वसिद्धिः, तत श्च सत्वासत्वयो र्विरोधसिद्धिः । इति ।

किञ्च – विरोध स्ताव त्त्रिधा व्यवतिष्ठते, वध्यघातक-भावेन, सहानवस्थानात्मनावा, प्रतिबद्ध्य प्रतिबन्धक रूपेणवा । तत्राद्ये त्वहिनकुला ग्न्युदकादि विषयः । सचैकस्मिन् काले वर्तमानयो स्संयोगे सति भवति, संयोगस्यानेकाश्रयत्वात् द्वित्ववत् । नासंयुक्त मुदक मग्निं नाशयति, सर्वत्राग्न्यभाव प्रसंगात् । तत स्सति संयोगे बलीयसो त्तरकाल मितर द्बाध्यते । नहि तथा ऽस्तित्व नास्तित्वयोः क्षणमात्रम प्येकस्मि न्वृत्ति रस्तीति-भवता भ्युपगम्यते, यतो वध्यघातकभावरूपो विरोध स्तयोः क – ल्प्येत । यदिचैकस्मिं स्तयो र्वृत्ति रभ्युपगम्यते, तदा तयो स्तुल्यबलत्वा न्न वध्यघातक भावः ॥ नापि सहानवस्थान लक्षणो विरोधः, सचैकत्र कालभेदेन वर्तमानयो र्भवति, यथा – आम्रफले श्यामतापीततयोः । उत्पद्यमानाहि पीतता पूर्वकालभाविनीं श्यामतां नाशयति । नहि तथाऽस्तित्वनास्तित्वे पूर्वोत्तरकालभाविनी । यदि स्यातां – अस्तित्वकाले नास्तित्वाभावा ज्जीवसत्तामात्रं सर्वं प्राप्नुवीत । नास्तित्वकाले चास्तित्वाभावा त्तदाश्रयो बन्धमोक्षादि व्यवहारो विरोध मुपगच्छेत । सर्वथैवासतः पुनरात्मलाभाभावात, सर्वथाच सतः पुन रभाव प्राप्त्यनुपपत्ते र्नैतयो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्सहानवस्थानं युज्यते ॥ तथास्तित्वनास्तित्वयोः प्रतिबध्य प्रतिबन्धकभावरूप विरोधोपि न सम्भवति । यथा - सति मणिरूपप्रतिबन्धके वह्निना दाहो न जायतइति मणिदाहयोः प्रतिबध्य प्रतिबन्धकभावो युक्तः, नहि तथा ऽस्तित्वकाले नास्तित्वस्य प्रतिबंधः, स्वरूपेणास्तित्वकालेपि पररूपादिना नास्तित्वस्य प्रतीतिसिद्धत्वात, इति ॥

यत्तु शीतोष्णस्पर्शयोरिवेति दृष्टान्तकथनम् , तदसत्, एकत्र धूपघटादा ववच्छेदकभेदेन शीतोष्णस्पर्शयो रुपलम्भा त्तयोरपि विरोधासिद्धेः ।

यथैकत्र चलाचलात्मनो वृक्षादौ रक्तारक्तात्मनो घटादा वावृत नावृतात्मनो श्शरीरादौ चोपलम्भा दविरोध स्तथा सत्त्वासत्त्वयोरपि ॥

एतेन वैयधिकरण्य मपास्तम् , सत्त्वासत्त्वयो रेकाधिकरणतया प्रतीति सिद्धत्वात ॥

यच्चानवस्थानदूषणमुक्तम् , तदपि नानेकान्तवादिनां दोषः । अनन्तधर्मात्मकस्य वस्तुनः स्वयं प्रमाण प्रतिपन्नत्वेनाभ्युपगमात् , अप्रामाणिकपदार्थ परम्परा परिकल्पनाविरहात् ।

एतेन संकरव्यतिकरावपि निरस्तौ, प्रतीति सिद्धेर्थे कस्यापि दोषस्याभावात , दोषाणां प्रतीत्यसिद्ध पदार्थ गोचरत्वात् । संशयादयश्च पूर्वमेव निरस्तमायाः । इत्यन्यत्रविस्तरः ।

अथैव मुपपत्त्या विरोधादि दोषाभावे प्रतिपादितेपि मिथ्यादर्शनाभि निवेशा त्तत्व मप्रतिपद्यमानं पुरुषं प्रति सार्वलौकिक हेतुवाद माश्रित्योच्यते । स्वेष्टार्थ सिद्धिमिच्छताप्रवादिना हेतुः प्रयोक्तव्यः,

20-6 ७

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रतिज्ञामात्रेणा र्थसिद्धे रभावात् । सचहेतुः स्वपक्षस्य साधकः प-रपक्षस्य दूषकश्च । येनरूपेण हेतो स्साधकत्वम् येनच रूपेणदूष-कत्वं न तादृशे रूपे हेतो रत्यन्तभिन्ने, तयो र्हेतुधर्मत्वेन हेत्वपेक्षया-कथञ्चि दभिन्नत्वात । नहि तयो र्हेत्वपेक्षया ऽनन्यत्वा द्येन रूपेण सा धकत्वम् तेन रूपेण दूषकत्वं च सम्भवतीति संकरः, येन रूपेण-साधकत्वं तेन रूपेण दूषकत्वमेवेति व्यतिकरोवा, साधकत्वदूष-कत्वयो र्विरोधोवा सम्भवति ; (१) तथा ऽनेकान्त प्रक्रियाया मपि विरोधादिदोषानवतारः ।

वस्तुतस्तु- अनेकान्तप्रक्रियायां सर्वेषां प्रवादिनामपि प्रतिपत्तिरेव । एकानेकात्मकस्य वस्तुन स्सर्वसम्मतत्वात् ।

सांख्यास्तावत् - सत्वरजस्तमसां साम्यावस्था प्रधानमित्याहुः । तेषां मते प्रसादलाघव शोषतापवारणादि भिन्नस्वभावाना मनेकात्मना मेकप्रधानात्मकत्व स्वीकारेणै कानेकात्मकवस्तुतः स्वीकृतत्वा-त । ननु प्रधानं नामेकं वस्तु नास्ति, साम्यावस्था मापन्ना स्सत्व रजस्तमोगुणाएव प्रधानम् , सत्त्वरजस्तमसां समूहे प्रधानपद-शक्ते स्स्वीकारादिति चेन्न ; तथा प्येकानेकात्मकवस्तुस्वीकार-स्या क्षतत्वात् । समुदायसमुदायिनो रभेदा त्समुदायिनां गुणा-ना मनेकेषां समुदायस्य चैकस्या भेदाभ्युपगमात् ।

---

(१) यथै कस्यैव हेतो रेकरूपेण स्वपक्षसाधकत्वं तद-न्यरूपेण परपक्षदूषकत्व मित्यंगीकारेपि तादृशहेतौ वर्तमानयोः कथंचि द्भिन्नाभिन्नयो स्तादृशरूपयो स्संकरो व्यतिकरो विरो-धश्च नसम्भवन्ति, तथैव सत्वासत्वयो रप्येकत्र वर्तमानयो स्तद्भावो निर्वाह्य इति भावः । (इतिटिप्पणी ॥)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

नैयायिकास्तु - द्रव्यत्वादिकं सामान्यविशेष मभ्युपगच्छन्ति । अनुवृत्तिव्यावृत्तिप्रत्यय विषयत्वा द्रव्यत्वादिकं सामान्यविशेषः । द्रव्यं द्रव्य मित्यनुगत बुद्धिविषयत्वा त्सामान्यम् । गुणो नद्रव्यं कर्म नद्रव्यमिति व्यावृत्तिबुद्धिविषयत्वा द्विशेषइति । एवंच सामान्यविशेषात्मकत्व मेकस्याभ्युपगतम् । एवं गुणत्वं कर्मत्वं च सामान्यविशेषइति बोध्यम् ।

सौगतास्तु - मेचकज्ञान मेक मनेकाकार मभ्युपगच्छन्ति । पञ्चवर्णात्मकं रत्नं मेचकम् । तज्ज्ञानं नैकप्रतिभासात्मकमेव, चित्रज्ञानत्वविरोधात । नीलपीतादि नानाकारज्ञानंहि चित्रज्ञानं, नत्वेकाकारमेव । नापि मेचकज्ञान मनेकमेव, मेचकज्ञान मिद मित्यनुभवविरोधात्, इमानि मेचकज्ञानानी त्यनुभवप्रसंगाच्च । ततश्च सदेकानेकात्मकं चित्रज्ञानं सौगतादीना मभिमतम् ।

चार्वाकास्तु - " पृथिव्यापस्तेजोवायुरिति चत्वारि तत्वानि, तेभ्य श्चैतन्यं, किण्वादिभ्यो मदशक्तिवत् " इति बार्हस्पत्यसूत्रानुरोधा त्पृथिव्यादिभूतचतुष्टयपरिणाम श्चैतन्यमिति वदन्ति । तच्च न पृथिव्याद्यपेक्षया ऽतिरिक्त मेकं तै रभ्युपगम्यते, तत्वान्तर प्रसंगात्, भूतचतुष्टयवादव्याघातात । नापि पृथिव्यादिक मेकैक मेव तत, घटादेरपि चेतनत्वापत्तेः । किन्तु पृथिव्या द्यनेकात्मक मेकं चैतन्यमिति ।

मीमांसकास्तु - प्रमातृप्रमिति प्रमेया कारमेकं ज्ञानम्, घटमहंजानामीत्यनुभवात ; ज्ञानानां स्वतः प्रकाशत्वात, इतिवदन्ति । तत्रानेक पदार्थ निरूपित विषयताशा लयेकं ज्ञाने स्वीकृतम् । विषयतानां च ज्ञानस्वरूपत्वा त्तादृशविषयतात्रयात्मकमेकं ज्ञानं स्वीकृत मिति ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एवंरीत्या मतान्तरे ष्वनेकान्त प्रक्रिया बुद्धि मद्भि रूह्येति सर्व मन्वदातम् ।

अनेकभंगै राक्रान्ता सिद्धान्ताम्बुधिसंगता ।
करोतु विद्वदानन्दं सप्तभंगीतरंगिणी ॥
श्रीम त्पंचगुरु देवेभ्यो नमः ।

प्लवंगसंवत्सरे वैशाखशुद्धे अष्टम्यांतिथौ बृहस्पतिवासरे पुष्यनक्षत्रे सुकर्मनामयोगे रजिवाकरणे एवंविधगशुभमुहूर्ते 'तंजा' नगरे श्रीमदादितिर्थैश्वरस्वामिसन्निधौ कटकलग्ने वीरनामग्रामवासिना-श्रीमदनन्तसेन देवस्वामिनां प्रियाग्रशिष्येण विमलदासेन सप्तभंगीनाम तर्कग्रन्थो लिखितः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
जिनागमेभ्योजिनमुनिभ्यो नमोनमः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्रीः ।

सप्तभंगीतरंगिण्याः

भूमिका ।

" सप्तभंगीतरंगिणी " नामाऽयं जैनग्रन्थः ' तंजा ' नगरसमीपवर्ति ' वीर ' (वीरापुरं) ग्रामवासिना विमलदासेन विरचितेत्यवगम्यते । यद्यपि ग्रन्थान्ते " विमलदासेन सप्तभंगीनाम तर्क ग्रन्थो लिखितः " इति पंक्ति र्दृश्यते । तथापि प्राचीनै र्ग्रन्धकारै र्बहुभि स्स्वनैच्यानुसन्धान परै स्स्वकृतग्रन्थे ष्वेवमेव विलेखनस्य बहुशो दृश्यमानत्वा दिदमपि नैच्यमनुसन्दधानेना नेनैवं लिखितमिति निश्चित्यास्य ग्रन्थस्य विमलदासप्रणीतत्वमेव निश्चिनुमहे । स्वस्य-वीरनाम ग्रामवासित्वंचायं स्वयमेवान्ते लिखति । अयं कदा कस्य कुले जातइति तु नास्माभि रद्य निर्णेतुं शक्यते।

अस्यचैकमेव पुस्तकं-के-सम्पत्कुमार चक्रवर्तिनाम्ना ९-११-१८९८दिने लिखितं चेन्नपुरस्थ राजकीय लिखित प्राचीन पुस्तकशाला-(Government Oriental Manuscripts Library Madras) स्थ पुस्तक प्रतिकृतिरूपं श्रीमता नेल्लूर्विभागान्तर्गत ' ओङ्गोल् ' स्थाने उपमाण्डलिक [सब्कलेक्टर] पदभाजा वेणुगोपाल श्रेष्ठिना प्रहित माश्रित्य तस्यैव श्रेष्ठिनः प्राचीनग्रन्ध प्रचारणोत्साहिनः प्रोत्साहनेन यथाबलं संशोधनं क्वचिदेव टिप्पण्या लंकरणं चाकारि ॥

कार्यवशाच्च प्रोषिते ष्वस्मासु ग्रन्थस्यास्य मुद्रणे शोधनादिषु तस्यैव श्रेष्ठिनो गुणपक्षपातेना स्मासुच निरतिशयेन सौहृदेन बहुमुखमवहितव्रतां श्रीमतां श्रीकांचीनगरस्थ ' श्रीशठकोपनिलय ' नामक संस्कृतविद्याशालाप्रधानाद्ध्यापकता मासेदुषा मस्मत्प्रियसुहृदां श्री श्रीशैल तातार्याणा मुपकार ममुं सततं स्मराम स्तेषुच वहामः कार्तज्ञ्यम् ।

इति निवेदयति

प्र — अनन्ताचार्यः ,

शास्त्रमुक्तावळ्याः, मंजुभाषिण्याः,

न्यायरत्नावळ्या श्च संपादकः ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.